Barcode : 1990020047478
Title - Mimamsa Koustubha vol.2 and Fasciculus 3
Author - Khandadeva
Language - sanskrit
Pages - 114
Publication Year - 1928
Barcode EAN.UCC-13
1 990020 047478

December 1928.

THE

CHOWKHAMBÂ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 372

मीमांसाकौस्तुभः ।

(मीमांसासूत्रोपरि काचन विस्तृता टीका)

(तृतीयाध्यायस्य प्रथमद्वितीयौ पादौ)

पूर्वोत्तरमीमांसापारावारपारीण–श्रीखण्डदेवविरचितः

श्रीकाशीहिन्दूविश्वविद्यालयपूर्वमीमांसाप्रधानाध्यापकेन

वेदविशारदबिरुदभाजा

पं० अ. चिन्नस्वामिशास्त्रिणा

तच्छिष्येण मीमांसाचार्येण कृष्णमूर्तिशर्मणा च

संशोधितः श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम् ।

MIMAMSA KAUSTUBHA

[An exhaustive Commentary of Jaiminisutras]

I & II Padas of III Adhyaya)

BY

Sri KHANDADEVA.

Edited by

"Veda Visarada" Pandit A. Chinnaswami Sastri,

Chief Professor of Mimamsa. Benares Hindu University

& his pupil "Mimamsacharya" Krishnamurthi Sarma,

Vol. II. FASCICULUS III–३

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE.

Vidya Vilas Press, North of Gopal Mandir, Benares.

1928.

Registered according to Act XXV. of 1867. (All Rights Reserved.)

॥ श्रीः ॥

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—३७२

*Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.*

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

नारभ्याधीतन्यायेनान्वयः परिकल्प्यते । अत एव तत्पूर्वभाव्य-संयुक्तस्य विश्वजिदादेः स्वर्गफलकल्पनम् । अन्यथा प्रकरणात् दर्शाङ्गत्वापत्तेः ।

नचैवमपि विश्वजित्पूर्वभाविनः अन्यानङ्गस्यैव श्येनादेः विश्वजिदङ्गं स्यादिति फलकल्पनाविषयाभावः।यत्र पूर्वोत्तरं विविधकर्मपुरस्कारेण वाचनिकसंख्यादिरूपगुणाम्नानं तत्र तन्मध्यपतितस्य विश्वजितः पूर्वोत्तरभाविकर्माङ्गत्वस्य तद्गुणाङ्गत्वस्य वा आकाङ्क्षानुवर्तकाभावेन वक्तुमशक्यत्वात् फलकल्पनोपपत्तेः । अतश्च प्रकृतेऽपि बहुभिर्निविन्मन्त्रैः व्यवधानात् प्रकरणविच्छेदोपपत्तेरुत्तराङ्गस्यानारभ्याधीतन्यायेन सामिधेन्यङ्गत्वोपपत्तेः नोपवीतविधौ प्रकरणानुवृत्तिः ।

वस्तुतस्तु अन्तरानूच्यमित्यादौ सामिधेनीमात्रवाचिपदाभावात् अनुवाक्याद्यनुवचनसाधारण्येन सर्वप्रकृताङ्गानुवचनमात्रोद्देशेन गुणविधानात् न सामिधेनीप्रकरणानुवृत्तिशङ्कापि ।

यद्यपि चान्ते(१)देवा वै सामिधेनीरनूच्येत्याद्यर्थवादे सामिधेनीकीर्तनं तदप्याधारस्तुत्यर्थत्वात् न सामिधेनीप्रकरणानुवृत्तिसूचकम् । नचैवं प्रकरणाभावे तासामाश्रयत्वानुपपत्तेः कथं काम्यवाक्ये तदाश्रितस्य गुणस्य फलार्थत्वेन विधानोपपत्तिरिति वाच्यम् । आश्रयालाभेन तत्रानुवचनान्तरस्यैव संख्यादिविशिष्टस्य (२)रेवत्यधिकरणन्यायेन गुणात् भिन्नस्य फले विध्यङ्गीकारात् तस्य च संख्यायुक्तानुवचनत्वसादृश्यात् पञ्चदशसंख्यायुक्तानुवचनप्रकृतिकत्वावगतेः तदीयर्चां त्रिरभ्यासादिधर्मान्तराणां च प्राप्त्युपपत्तिः ।

ननु प्रकृतावनुवचनस्य द्वितीयया ऋक्संस्कारार्थत्वावग-

१. तै. सं. २-५-१०. २. पू. मी. २-२-१२.

मात् अग्निसमिन्धनप्रकाशकानामृचां प्राधान्येनातिदेशायोगः । न चानुवचनस्य ऋक्संस्कारार्थत्वेन विधाने उद्देश्यविशेषणीभूतायास्संख्यायाः अविवक्षापत्तिः । एकादशानामृचां प्रकृतौ समाम्नातानां प्रथमोत्तमात्रिरभ्यासेन पाञ्चदश्यस्य प्राप्तत्वेनेष्टापत्तेः । न च पाञ्चदश्यविध्यभावे अनारभ्याधीतसाप्तदश्यस्य ऋगभ्यासेन ऋगन्तरागमेन वा प्रकृतावेव निवेशोपपत्तेः तद्व्यावृत्त्यर्थं पाञ्चदश्यविध्यावश्यकत्वमिति वाच्यम् । तर्हि उच्चारणरूपस्यार्थाभिधानरूपस्य वानुवचनस्य मन्त्रान्तरेष्विव न्यायादेव प्राप्तेः तदनूद्य सामिधेन्युद्देशेन पाञ्चदश्यविधानोपपत्तेः । सर्वथा प्रकृतावृचां प्राधान्यादतिदेशायोगः ।

यद्यपि च तासामनुवचनं प्रति गुणत्वं स्यात् तथाप्यनुवचनफलाग्निसमिन्धनप्रकाशकत्वेनैव तत् सामर्थ्यात् स्यात् । अतश्च द्वारलोपात् विकृतौ तद्बाधः, प्रतिष्ठापरतया ऊहो वा प्रसज्येत, ततश्च नित्यानुवचनस्य प्रसङ्गसिद्धिर्वक्ष्यमाणा विरुद्ध्येतेति चेत्, न; यत एवात्र सर्वं सम्भवत्प्राप्तिकं तत एव वाक्यवैयर्थ्यपरिहाराय सक्तुन्यायेन विनियोगभङ्गं प्रकल्प्य सामिधेनीगुणकानुवचनस्यैव सामर्थ्यपरिकल्पिताग्निसमिन्धनार्थत्वेन विध्यङ्गीकारात् ।

न च साप्तदश्यव्यावृत्तिफलकपाञ्चदश्यविधानेनार्थवत्ता । अनारभ्याधीतस्य साप्तदश्यस्य विकृतिपरत्वेनाप्युपपत्तौ प्राकरणिकमन्त्राणां अभ्यासस्य ऋगन्तरागमस्य वा कल्पयितुमशक्यत्वेन तस्य प्रकृतौ प्रसक्त्यभावात्, प्रसक्तावपि वा (३)'सप्तदश वैश्यस्ये'ति वैश्यनिमित्तकसाप्तदश्यविधिवैयर्थ्यापत्तेः तद्बलेनैव व्यावृत्तिसिद्धेश्च । एवञ्च प्राकरणिकेन पाञ्चदश्येनानार-

३. तै. सं. २-१-९.

भ्याधीतसाप्तदश्यबाध इत्याद्यधिकरणानि पाञ्चदश्यविधिं कृत्वा चिन्तया प्रचयशिष्टप्राकरणिकमन्त्रपाञ्चदश्यपरतया द्रष्टव्यानि ।

अत एवानारभ्याधीतस्य साप्तदश्यविधेः मित्रविन्दादिप्रकरणस्थविधिना उपसंहारवत् वैश्यनिमित्तकविधिना उपसंहारशङ्कापि इष्टापत्त्यैव परिहृता । अतश्च पाञ्चदश्यस्य प्रकृतौ विध्यभावात् अनुवचनस्यैव सामिधेनीगुणकस्यार्थकर्मतया विध्यवगतेः युक्तो विकृत्यर्थानुवचने ऋक्सामतिदेशः । गुणत्वमपि च तासां नानुवचनफलप्रकाशकतया, अपित्वनुवचनजनकतयैव लाघवात् । अतश्च न तद्द्वारलोपाद्बाधः ऊहो वा ।

नन्वेवं फलार्थस्यानुवचनान्तरस्य बहिःक्रत्वप्यनुष्ठानोपपत्तेः क्रतुप्रकरणाम्नानवैयर्थ्यापत्तिः । न च प्रकृतौ अनुशब्दवाच्यस्य (१)'नमः प्रवक्त्रे' इत्यादि परप्रयुक्तनिगदानन्तर्यस्याप्यङ्गत्वेन विकृतौ तस्यातिदेशेन प्राप्तेः परप्रयुक्तनिगदाक्षेपायोगात् आनन्तर्यासम्भवेन बहिःक्रतु प्रयोगानुपपत्तिरिति वाच्यम् । तस्य(२) "पञ्चजना मम होत्रं जुषध्वं । तदद्य वाचः प्रथमं मशीय" इत्यादिवाक्यपर्यालोचनया करिष्यमाणसर्वकर्मार्थत्वेन सामिधेनीमात्रार्थत्वेन वा प्रवक्त्रादिप्रार्थनापरत्वावसायात् सामिधेन्यङ्गत्वस्यापि सत्वेन बहिःक्रतु प्रयोज्यत्वोपपत्तेः ।

नचैवमपि अनुवाक्यादिवत् 'अग्नये समिध्यमानायानु ब्रूही'ति प्रैषानन्तर्यस्यैवानुशब्दार्थत्वावसायात् तस्य चाग्निसमिन्धनप्रकाशकस्य बहिःक्रतु प्रयोगायोगात् तदानन्तर्यलाभार्थमनुवचनान्तरस्यापि क्रतुमध्ये प्रयोगोपपत्तिरिति वाच्यम् । तस्यापि स्वफलार्थमनुवचनानुज्ञापनरूपस्याङ्गस्य विकृतावूहेन प्रयोगो-

---

१. आश्व. श्रौ. १-२-१.   २. आश्व. श्रौ. १-२-१.

पपत्तेः बहिःप्रयोगेऽप्याक्षेपणसम्भवादिति वाच्यम् । अनुशब्देन उत्तरकालवाचिना साङ्गसामिधेनीभावनायां तदङ्गभूतपूर्वपदार्थोत्तरकालत्वस्य विहितत्वात् पूर्वपदार्थस्य च परप्रयुक्तस्याक्षेप्तुमशक्यत्वेन तदुत्तरकालत्वासम्भवात् बहिःक्रतु प्रयोगानुपपत्तेः ।

न च पाठप्राप्तपूर्वपदार्थानन्तर्यरूपस्य क्रमस्यानुशब्देनानुवादात् तदभावेऽपि च विकृतौ लुप्तपूर्वपदार्थान्तरभाव्युत्तरपदार्थानुष्ठानवत् बहिःक्रतु प्रयोगे प्रधानभूतानुवचनमात्रस्यानुष्ठानोपपत्तिरिति वाच्यम् । विकृतौ पदार्थप्राप्त्यनन्तरं प्राप्स्यमानस्य क्रमस्य कथमप्यसम्भवेन तं विना पदार्थानुष्ठानेऽपि इह प्रकरणमध्याम्नातस्य वैकृतानुवचनस्य क्रतुमध्यप्रयोगेनापि क्रमानुग्रहसम्भवे काम्यप्रधानमात्रानुष्ठानानुपपत्तेः क्रतुप्रकरणमध्यानुष्ठीयमानवैकृतानुवचनेनैव प्रसङ्गात् प्रकृतानुवचनकार्यसिद्धेः न तस्य प्रधानानुष्ठानापत्तिः । अतश्च काम्यकल्पेष्वपि सामिधेनीप्रकरणानुवृत्त्यनपेक्षणात् न तदनुरोधेनाप्युपवीतविधौ तदनुवृत्तिरिति न सामिधेनीमात्राङ्गमुपवीतम् ।

न च तर्हि काम्याङ्गमेवास्तूपवीतम् । तेषां फलवत्त्वेनानुपहताकाङ्क्षाणामुज्जीवनार्थं दर्शपूर्णमासादिष्विव सन्दंशानपेक्षणात् । पूर्वोत्तरावधित्वेन हि तत्र क्वचित्सन्दंशोऽपेक्ष्यते । न तु तदुज्जीवनार्थम् । अप्रतिबद्धत्वात् । पूर्वोत्तरावधेस्त्विह वाचनिकाङ्गैरेव सिद्धेः न सन्दंशापेक्षणमिति वाच्यम् । तेषां विकृतित्वेन क्लृप्तोपकारप्राकृताङ्गनिराकाङ्क्षत्वात् प्राकृताङ्गानुवादेन प्राकृताङ्गसम्बन्धिगुणविधिमध्यपातेन वा विधिं विना प्रकरणेन ग्रहणायोगात् फलवतोऽपि व्यापकमहाप्रकरणमध्यपातेनाकाङ्क्षावश्यंभावाच्च । अतश्च सिद्धं उपवीतस्यान्याङ्गत्वासम्भवात् महाप्रकरणात् दर्शपूर्णमासाङ्गत्वम् ।

प्रयोजनं अस्यापि कर्तुरवैगुण्यापादकत्वेन तत्संस्कारत्वात् पूर्वपक्षे सामिधेन्यारम्भे तत्कर्त्रा, सिद्धान्ते दर्शपूर्णमासप्रयोगारम्भे तत्कर्तृभिरुपवीतमनुष्ठेयमिति द्रष्टव्यम् । सूत्रं स्पष्टम् ॥

इत्येकादशमुपवीताधिकरणम् ॥

अथ द्वादशं वारणादीनां सर्वयज्ञार्थत्वाधिकरणम् ॥ (१२)

सू—गुणानां च परार्थत्वादसम्बन्धस्समत्वात् स्यात् ॥ ३–१–२२ ॥

(विषयसंशयौ)

आधानप्रकरणे पवमानेष्टिसन्निधौ(१) "वारणो यज्ञावचरः स्यात् न त्वेतेन जुहुयात्, वैकङ्कतो यज्ञावचरस्स्यात् जुहुयादेवैतेने"ति श्रुतम् । तत्र अवचर्यते अनुष्ठीयते अनेनेति व्युत्पत्त्या अवचरशब्दः साधनवाची । अतश्च वारणवैकङ्कतजात्योः वाक्येन यज्ञोद्देशेन विधानं पूर्ववाक्ययोः । साक्षाच्च जात्या तदाधारकाष्ठेन वा द्रव्यान्तरावरुद्धयज्ञासम्भवात् तदङ्गभूतप्रक्षेपतदतिरिक्तक्रियाणां वैकङ्कते वारणे च द्वारत्वेन विधानमुत्तरवाक्ययोः । न्यायसुधायां तु वैकङ्कतस्य सर्वक्रियार्थत्वमित्युक्तम् ।

तत्र च यज्ञशब्देनाधानाङ्गपवमानेष्टिमात्रमुद्देश्यत्वेनोच्यते ? किं वा यज्ञमात्रमिति सन्देहः । साधनत्वस्यात्रावचरशब्देनोपादानात् कृदन्तत्वेन मुख्यश्रुतित्वाभावेन गौणश्रुतित्वात् पादाध्यायसङ्गतिः । अनन्तरा तु उपवीतस्य दूरस्थसामिधेन्यसम्ब-

---

१. मै. स. १. ७–७.

न्धेऽभिहिते पात्राणामपि तद्वदेव दूरस्थपवमानेष्टिसम्बन्धमात्रनिराकरणात् प्रासङ्गिकी ।

(पूर्वपक्षः)

तत्र वाक्येन वारणवैकङ्कतयोः यज्ञोद्देशेन विधानेऽपि यज्ञस्वरूपे आनर्थक्यप्रसक्तौ अपूर्वसाधनलक्षणार्थं प्रकरणानुप्रवेशे प्रसक्ते प्रकृतापूर्वसाधानस्याधनस्य यज्ञत्वाभावात् तस्मिन्नेवानर्थक्यप्रसक्तौ प्रकरणात्तदङ्गभूतानां पवमानेष्टीनां यज्ञत्वात् तत एव प्रकृतापूर्वोपकारकत्वसम्बन्धेन यज्ञपदेनोद्दिश्य वारणादि विधीयते । यद्यपि हि पवमानेष्टीनां प्रदेशान्तरपाठितत्वात् न विशिष्याधिकारोऽस्त्युपस्थापकः, तथापि प्रधानाधिकारेणैव प्रधानांशे बाधितेन तत्सम्बन्धिपवमानेष्ट्युपस्थापनादानर्थक्यतदङ्गन्यायेन वारणादेस्तदर्थताविरोधः । इष्यते च पश्वङ्गयवावदानसम्बन्धिनो मनोतामन्त्रस्य महाप्रकरणात् ज्योतिष्टोमे प्राप्तावानर्थक्यतदङ्गन्यायेन तदङ्गभूते स्वरूपेणासन्निहितेऽपि सवनीये प्राप्तिः । अत एव तद्व्यावृत्त्यर्थं 'यद्यप्यन्यदेवत्य' इति वचनमिष्टम् । तस्मात् स्वतोऽनुपस्थापितस्यापि प्रधानाधिकारेणोपस्थितत्वात् पवमानेष्टिमात्रार्थत्वं वारणादेरिति प्राप्ते—

(भाष्यकारीयस्सिद्धान्तः)

भाष्यकारेण तावदेवं सिद्धान्तितम्—सत्यं पवमानेष्टीनामाधानार्थत्वे पात्राणां तत्र निवेशो युक्तः । तासां तु (१)'यदाहवनीये जुहोती' तिवचनेनाग्न्युत्पत्त्यर्थत्वावगमात् आधानेन समप्राधान्यावगतेः आनर्थक्यतदङ्गन्यायाभावेन आधानप्रकरणपाठितानां पात्राणां पवमानेष्टिषु निवेशो युक्त इति । तस्यायमाशयः—

१. तै. ब्रा. १-१-१०.

यद्यप्यनारभ्याधीतेन 'यदाहवनीये जुहोति' इत्यनेन न पवमानेष्टीनामग्न्यङ्गत्वं प्रतिपत्तुं शक्यम्। सप्तम्याः द्वितीयार्थलक्षणायां प्रमाणाभावात् , पवमानेष्टिवत् क्रत्वन्तराणामप्यङ्गत्वापत्तौ तेषां निष्फलत्वापत्तेश्च। नचानारभ्याधीतस्य वाक्यस्य प्रकृत्यर्थत्वादिहातिदेशेनाग्निप्राप्त्यसिद्धत्वेनाङ्गत्वासम्भवेऽपि प्राधान्यकल्पनोपपत्तिः। अप्राकृतकार्यकारितापत्तेः, औपदेशिकेन प्रकरणावगताधानाङ्गत्वेन तद्बाधाच्च। अन्यथा विश्वजिदादिवत् पवमानेष्टीनामपि फलकल्पनया अग्न्यङ्गत्वस्यैवानापत्तेः, तथाप्यनारभ्याधीततुल्येनाधानप्रकरणाधीतवाक्येन सर्वेषामाधानाङ्गतया संभाव्यमानानां पूर्णाहुत्यादिहोमानां साक्षादाहवनीयाङ्गत्वावगमात् पवमानेष्टीनामपि तदङ्गत्वावगतिः। अत एव तत्र द्वितीयार्थे सप्तमी। आहवनीयस्यासिद्धत्वेन होमाङ्गत्वासंभवात्। अतश्चोभयोरप्याधानपवमानेष्ट्योरग्न्यङ्गत्वात् परस्पराङ्गाङ्गिभावाभावेनानर्थक्यतदङ्गन्यायासंभवात् वारणादेः स्वतोऽसन्निहितासु पवमानेष्टिष्वेव निवेशानुपपत्तेः वाक्येन सर्वयज्ञार्थत्वमिति॥

वार्तिककारस्तु—अश्रुतवाक्यकल्पने प्रमाणाभावात् कल्पनेऽपि वा तेन यज्ञरूपाणां पवमानेष्टीनां आहवनीयाङ्गत्वानुपपत्तेः तासामाधानाङ्गत्वमेव। अत एव कल्पितेन वाक्येनाधानाङ्गभूतानामेव पूर्णाहुत्यादिहोमानामाहवनीयाधिकरणत्वसिद्धिः, न तु तेषां साक्षादाहवनीयाङ्गत्वम् , सप्तम्या द्वितीयार्थलक्षणायां प्रमाणाभावात्। अत एव तदाधानविशेषजन्यपरमापूर्वविशिष्टाग्निवाचिनोऽप्याहवनीयप्रातिपदिकस्यासिद्धार्थकत्वात् आधानजन्योत्पत्त्यपूर्वविशिष्टाग्नावेव लक्षणेत्यप्यवगन्तव्यम्। न ह्यन्यथा तेषूक्तविधाहवनीयप्रापकमन्यत् प्रमाणमस्ति।

यद्यपि च पवमानेष्ट्यङ्गभूतानां प्राकृतानां होमानामातिदेश-प्राप्तमुख्याहवनीयाधिकरणकत्वबाधेऽपि सति संभवे प्रकृतिदृष्टस्य आधानविशेषप्रयोज्यापूर्वविशिष्टाग्न्यधिकरणकत्वस्य साद्यस्क्रे अग्नीषोमीयानुबन्ध्ययोः पौर्वापर्यस्येव बाधे प्रमाणाभावात् उक्तविधाहवनीयाधिकरणकत्वप्रापकमन्यदस्ति प्रमाणम् । इदमेव च पवमानेष्ट्यङ्गभूतानां हविःश्रपणपिष्टलेपफलीकरणहोमानां उक्तविधगार्हपत्यान्वाहार्यपचनाधिकरणकत्वप्राप्तौ प्रमाणमिष्यते तथापि अप्राकृतानामाधानसम्बन्धिहोमानां उक्तविधाहवनीयाधिकरणत्वसिद्धाविदमेव वाक्यं शरणम् ।

यत्तु भवदेवेन प्रधानदेशत्वादङ्गानां तल्लाभ इत्युक्तम्, तदाधानस्य कुण्डत्रयसाधारणत्वात् व्यवस्थालाभे प्रमाणाभावादुपेक्षितम् । तस्मात् सत्यपि वचने पवमानेष्टीनामाहवनीयाङ्गत्वासंभवात् आधानाङ्गभूतासु सतीष्वेतासु प्रकृतयज्ञाभावादनिवेश इत्याह । तत्र चायमभिप्रायः न्यायसुधाकृता विवृतः—

यज्ञशब्दः प्रधानयज्ञानामेवाभिधायकः। (१)"स एष यज्ञः पञ्चविधः—अग्निहोत्रं, दर्शपूर्णमासौ, चातुर्मास्यानि, पशुः, सोमः, इत्यादिवाक्यपर्यालोचनया तथैव शक्तिग्रहात् । न च पशोरङ्गभूतस्यात्रोपादानादसिद्धिः । पशुपदस्य निरूढपशुबंधस्यैवात्र ग्रहणात् । अत एवैकादशे 'पञ्चभिर्युनक्ति पांक्तो यज्ञ' इति यज्ञपदश्रवणात् (२)"अग्निं युनज्मि शवसा घृतेनेति युनक्ती"त्येतद्वाक्यविहितस्याग्नियोगस्य प्रधानमात्रार्थत्वं भाष्यकारेण सिद्धान्तितम् ।

वार्तिककारेण च यज्ञसंयोगस्य गुणवाक्यस्थत्वेन तद्दूषितम् । अतश्च पवमानेष्टीनामाधानाङ्गत्वेन यज्ञा-

१. ऐ. ब्रा. २. तै. सं. ५-४-१०.

ङ्गत्वाभावात् वारणादेः सार्वत्रिकत्वमिति, तन्न; यज्ञपदस्य यजतिपर्यायस्यातिरिक्तशक्तिकल्पने प्रमाणाभावात् । अन्यथा "(१) सर्वस्मै वा एतद्यज्ञाय गृह्यते" (२) "एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्तः" इत्यादावपि प्रधानयज्ञग्रहणापत्तौ आज्यभागादिषु ध्रौवाज्यवषट्कारादिप्राप्त्यसनापत्तेः । अतएवैकादशे यज्ञशब्दो यागमात्रवचनश्चेदङ्गयागानपि ब्रवीतीति वार्तिककृताभिहितम् ।

तस्मादेवमभिप्रायो वाच्यः—सर्वत्रैव प्रकृतनिवेशः स्वोद्देश्यस्य लक्षणीयापूर्वेण व्यभिचरितसम्बन्धे प्रकरणादङ्गीक्रियते । यथा "व्रीहीन् प्रोक्षति" इत्यादौ । अत एव तादृशस्थले प्रधानसम्बन्धानुपपत्तौ आनर्थक्यतदङ्गन्यायेन स्वतोऽसन्निहितेनाप्यङ्गेन प्रधानोपस्थापितेन धर्मसम्बन्ध इष्ट एव, यथा मनोतामन्त्रस्य सवनीयेन । तत्र ह्यग्नेरव्यभिचरितक्रतुसम्बन्धाभावेन प्रकरणं विना अपूर्वसाधनलक्षणानुपपत्तेः तेन प्रधानसम्बन्धावश्यंभावात् तत्रानुपपत्तौ तदङ्गभूतसवनीयसम्बन्धः कथञ्चिदुपस्थित्याऽङ्गीक्रियते । प्रकृते तु यज्ञशब्देनैवाऽव्यभिचारितापूर्वसाधनत्वोपस्थितौ तदर्थं प्रकरणानुप्रवेशायोगात् प्रधानसम्बन्धस्यैवाप्रसक्तौ क्वत्यस्तदुपस्थापिताङ्गसम्बन्धः ।

एवं सत्यपि यदि पवमानेष्टिसन्निधाविदमाम्नायेत ततो भवेत्तन्मात्राङ्गं वारणादि । तदा हि अनुवादस्य पुरोवादसापेक्षतायां सति संभवे सन्निहितपुरोवादविषयत्वौचित्यात् तन्मात्रविषयता भवत्येव ।

अत एव "व्रीहिभिर्यजेत," "सप्तदशारत्निर्वाजपेयस्य यूपः" (३) "प्रयाजे प्रयाजे कृष्णलं जुहोति" इति प्रकरणा-

१. तै. ब्रा. ३. ३-५.   २. तै, सं. १-६-११.   ३. तै. सं-२-३-२

तिदेशादिना सन्निहितपुरोवादविषयत्वलाभः । अत्र हि अव्यभिचरितक्रतुसम्बन्धेनैवापूर्वसाधनत्वोपस्थितेः तदर्थं प्रकरणानुप्रवेशाभावेऽपि अनुवादस्य पुरोवादसापेक्षत्वात् तल्लाभः । प्रकृते तु पवमानेष्टीनां स्वतस्सान्निधानाभावात् सन्निहितस्य चाधानविधेः पुरोवादत्वाभावात् वाक्यमात्रेण सर्वयज्ञार्थत्वं वारणादेः । तत्रापि च यज्ञोद्देशेन विधानात् "एष वै सप्तदशः प्रजापति" रितिवत् न प्रकृतिमात्रार्थत्वम् ।

प्रयोजनं पूर्वपक्षे पात्राणामान्तं धारणात् तैरेवोपादानलाघवेन दर्शाद्यनुष्ठानोपपत्तावपि दैवात् तेषां नाशे दर्शाद्यर्थमनियतानामुत्पत्तिः । सिद्धान्ते वारणानामेवेति द्रष्टव्यम् ।

सूत्रं तु गुणानां वारणादीनां आधानाभिन्नयज्ञार्थत्वात् तैरेवासम्बन्धानां तदङ्गभूते अवतारसम्भवात् पवमानेष्टीनां च स्वतस्सन्निधानाभावे यज्ञान्तरैस्समत्वादसम्बन्ध इति व्याख्येयम् ।

अथ वा सर्वयज्ञार्थत्वस्य "पूषा प्रपिष्ट" इतिवदर्थात् पूर्वाधिकरणे निषिद्धां सामिधेन्यङ्गत्वमाशङ्क्य तन्निराकरणार्थत्वेन व्याख्येयम् ॥

इति द्वादशं वारणाधिकरणम् ।

अथ त्रयोदशं वार्त्रघ्न्याधिकरणम् (१३) ॥

सू—मिथश्चानर्थसम्बन्धः ॥ ३—१—२३ ॥ (सि)

(विषयसंशयौ)

आज्यभागक्रमे समाम्नातानां वार्त्रघ्नीवृधन्वतीमन्त्राणां किं लिङ्गक्रमौ बाधित्वा (१)"वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृध-

१. तै. सं. २-५-२.

न्वती अमावास्यायां'' इति वाक्याभ्यां प्रधानयागाङ्गत्वम्? उत लिङ्गक्रमाभ्यामाज्यभागाङ्गत्वमेव। वाक्यद्वयं तु व्यवस्थार्थमिति विचार्यते।

(सङ्गतिः)

पूर्वपक्षे च सप्तम्या द्वितीयार्थत्वलक्षणात् गौणश्रुतिविनियोगोपयोगिचिन्तनेन पादाध्यायसङ्गतिः। पूर्वं च वाक्येन दुर्बलप्रमाणोपजीविने समर्थिते तदपवादकरणादनन्तरा।

(पूर्वपक्षः)

विद्वद्वाक्ये च कर्मान्तरत्वावेदकप्रमाणाभावात् तत्र मन्त्रविनियोजकत्वानुपपत्तावपि आग्नेयादिषु तदुपपत्तेः नानयोः व्यवस्थार्थत्वमित्यधिकाशङ्कोत्थानात् पौर्णमास्यधिकरणेनापौनरुक्त्यम्। तत्र कालकृतव्यवस्थापक्षस्य पौर्णमास्यधिकरण एव निराकृतत्वात् कर्मकृतव्यवस्थापक्षस्य तत्तत्कालीनप्रधानाङ्गभूताज्यभागकर्मत्वलक्षणापवादकत्वेन गुरुभूतत्वात् लाघवेन पौर्णमस्यमावास्यापदाभ्यां निरूढलक्षणया प्रधानानि, सप्तम्या च कर्मत्वमुक्त्वा तदुद्देशेन मन्त्रो विनियुज्यते।

न च लिङ्गक्रमबाधः। क्रमस्य तावत् दुर्बलत्वेन बाधस्य गुणत्वात्। एवं च सामान्यसम्बन्धबोधकप्रमाणाभावेन लिङ्गस्याप्रयोजकत्वाच्च।

वस्तुतस्तु ब्राह्मणगतवाक्यापेक्षया लिङ्गस्यापि मन्त्रगतस्य दौर्बल्यमेव। अत एव ''यद्यप्यन्यदेवत्यः पशु'' रिति वाक्येन मनोतामन्त्रस्य लैङ्गिकी सवनीयाङ्गता बाध्यत इति वक्ष्यते। बीजं चात्र (२)बलाबलाधिकरणे वक्ष्यते। प्रशास्तर्यजेति मन्त्रलिङ्गे ''मैत्रावरुणः प्रेष्यति चानुचाहे'' ति ब्राह्मणवाक्यस्य

२. पू. मी. ३-३-७.

बाधस्तु सामान्यविशेषादिरूपप्रमेयबलाबलेन द्रष्टव्यः । न तु वाक्यदौर्बल्येनेति ध्येयम् । तस्मात् प्रधानमात्राङ्गत्वमेवेति प्राप्ते—

(सिद्धान्तः)

ब्रूमः—दुर्बलस्यापि प्रमाणस्याबाधेनोपपत्तौ तद्बाधे प्रमाणाभावात् नात्र प्रधानाङ्गत्वसम्भवः । न ह्यत्र सोमप्रकाशकस्य मन्त्रस्य कथमपि लिङ्गाविरोधस्संभवति । अमावास्यायां सोमस्याधिष्ठानत्वेनाप्यभावात् ।

न च पौर्णमास्यां सोमस्य देवतात्वाभावेऽपि अग्निप्रकाशकस्य सोमप्रकाशकस्य च मन्त्रस्य समुच्चयाङ्गीकारेणाग्नीषोमदेवताप्रकाशकत्वोपपत्तेः लिङ्गाविरोध इति वाच्यम् । पुरोनुवाक्यामन्वाहेत्युपादेयगतैकत्वस्य विवक्षितत्वात् पुत्रेष्टिवच्च "द्वे द्वे पुरोनुवाक्ये भवत" इति विध्यभावात् एकस्मिन् कर्मणि अनुवाक्याद्वयानुपपत्तेः । क्रमबाधश्चोभयत्र स्पष्ट एव ।

वस्तुतस्तु न केवलमबाधपक्षपातितयैव वाक्येन तयोरबाधः । अपि तु नियमविधिलाघवानुरोधेनापीत्युक्तं पौर्णमास्यधिकरणे । अत एव तदनुरोधेन लक्षणाङ्गीकरणमप्यदोषः ।

एवं च प्रधानक्रमाम्नातानां अनुवाक्यान्तराणां बाधः । आज्यभागयोश्चाश्रुतानुवाक्याकल्पनं नाश्रितं भवति । तस्मात् व्यवस्थार्थमेवेदं वाक्यद्वयम् । सा च कर्मकृतेत्युक्तमेव पौर्णमास्यधिकरणे ॥

प्रयोजनं स्पष्टम् ॥

सूत्रं तु प्रधानस्यानुवाक्यानां च मिथो न प्रयोजनप्रयोजनिसम्बन्धः, लिङ्गादिबाधापत्तेरिति व्याख्येम् ॥

इति त्रयोदशं वार्त्रघ्न्याधिकरणम् ॥

अथ चतुर्दशं हस्तावनेजनादीनां कृत्स्न-प्राकरणिकाङ्गताधिकरणम् ॥ (१४)

सू—आनन्तर्यमचोदना ॥ ३-१-२४ ॥ (सि)

(विषयः)

दर्शपूर्णमासयोः "हस्ताववनेनिक्ते" इति विधाय श्रुतं "उलपराजींस्तृणाती" ति। तत्रावनेजनं द्वितीयाश्रुत्या अदृष्टविध-या दृष्टविधयैव वा हस्तसंस्कारार्थम्। तदपि कर्तृत्वांशेन। न तु भोक्तृत्वांशेन, मलापकर्षणार्थत्वात्। यद्यपि पूर्वमेव शुद्ध्यन्त-रमप्यनुष्ठितमस्ति तथापि मन्त्रानेकत्वे स्मृतिदार्ढ्यवत् शुद्ध्य-न्तरस्यापि बाधकाभावः।

अत एवास्य सिद्धान्ते सर्वार्थत्वेऽपि न पूर्वपदार्थाङ्गत्वमि-त्यर्थक्रमेण पाठक्रमं बाधित्वा न सर्वादावनुष्ठानम्। ततश्चावने-जनसंस्कृतस्य कर्तृहस्तस्य उपयोगापेक्षायामुत्तरकालभाविपदा-र्थसाधनत्वमित्यप्यविवादमेव।

(संशयः)

उत्तरपदार्थस्तु किमव्यवहितानन्तर एव, अथवा सर्व ए-वेति सन्दिह्यते। अत एव श्रुतिविनियोगोपयोगिहस्तनिष्ठापूर्व-साधनत्वविचारात् पादाध्यायसङ्गतिः। तत्प्रसङ्गाच्च ज्योतिष्टो-मप्रकरणस्थं "मुष्टीकरोति," "वाचं यच्छती" त्याद्यप्युदाहरणम्।

इदं हि द्वयमपि लिङ्गान्मनःप्रणिधानद्वारा दीक्षितकर्तृसंस्का रकं सत् करिष्यमाणकर्मार्थमेव, दीक्षितत्वपुरस्कारेण विहितस्य सर्वार्थत्वेऽपि पूर्वपदार्थाङ्गत्वानुपपत्तेः। अतस्तत्राप्यव्यवहितो-त्तराम्नातदीक्षितावेदनमात्रार्थत्वम्? उत वाग्विसर्गाङ्गुलिविस-र्गपूर्वभावियावत्पदार्थत्वमिति विचारः।

(सङ्गतिः)

पादसङ्गत्यभावेऽपि प्रासङ्गिको द्रष्टव्यः । श्रुत्यैव वा मुष्टिवाग्यमयोः संस्कारार्थत्वमित्यपि सुवचम् । मुष्टीकरणस्य वाग्यममात्राङ्गत्वशङ्का तु उभयोरपि कर्तृसंस्कारकत्वेन परस्पराङ्गत्वानुपपत्तेनातीवादर्तव्यः । अनन्तरा त्वानन्तर्यरूपक्रमापवादात् स्पष्टा ।

(पूर्वपक्षः)

अत्र आनन्तर्यादव्यवहितपदार्थाङ्गत्वमेव । नचानन्तर्यस्य बहुषु पठितेषु कस्यचिदवर्जनीयत्वात् नाङ्गतानियामकत्वमिति वाच्यम् । सन्निधिविशेषाम्नानवैयर्थ्यपरिहारार्थं तस्यापि प्रकरणादिकल्पनेनाङ्गताग्राहकत्वात् । अन्यथा उपहोमानां विकृत्यङ्गत्वानुपपत्तेः । न च सन्निधानस्य नियामकत्वेऽपि प्रकृते सर्वार्थताग्राहकप्रकरणाविरोधात् तदसम्भवः । साधारणस्य प्रकरणस्य विशेषनिष्ठानन्तर्येणोपसङ्कोचोपपत्तेः । अन्यथा "शुन्धध्व"मिति प्रोक्षणमन्त्रस्यापि प्रकरणात् सर्वप्रधानाङ्गभूतपात्रप्रोक्षणाङ्गत्वापत्तेः सन्निधानात् सान्नाय्याङ्गभूतपात्रप्रोक्षणार्थता वक्ष्यमाणा विरुध्येत ।

अतो विरुद्धविषये प्रकरणस्य प्राबल्येऽपि अविरुद्धविषये उपसंहार एवेति पूर्वपक्षवादी मन्यते । अतश्चावनेजनमुलपराजिस्तरणाङ्गम् । मुष्टीकरणवाग्यमौ चाध्वर्युकर्तृकदीक्षितावेदनफलीभूतज्ञानजननद्वारा आवेदनाङ्गम् । न तु सर्वाङ्गम् ।

(सिद्धान्तः)

सिद्धान्तवादी तु न वाक्यादिमात्रकल्पनया शीघ्रप्रवृत्तेन प्रकरणेन प्रमितस्य सर्वार्थत्वस्य प्रकरणादिकल्पनसापेक्षेण पश्चात्प्रवृत्तेन सन्निधिना युक्त उपसंहारः, तथात्वे विकल्पापत्तेः ।

अत एव न यत्र सामान्यशास्त्रस्य प्रथमप्रवृत्तिकत्वं तत्रैवोपसंहार इति वक्ष्यते । शुन्धनमन्त्रस्य तु न प्रकरणात् झटित्येव सर्वप्रधानाङ्गत्वावगमः । द्वारकल्पनासापेक्षत्वात् । सान्नाय्याङ्गता तु सन्निधिना तद्द्वारस्य तदीयपात्रशुन्धनरूपस्य क्लृप्तत्वात् झटित्यवगम्यत इति युक्तः तत्र सन्निधानेन प्रकरणस्योपसंहारः । प्रकृते तु द्वारक्लृप्तेः सर्वत्राविशेषात् वैपरीत्यमिति वैषम्यम् ।

वस्तुतस्तु अवर्जनीयत्वात् बहुषु किंचिदानन्तर्यस्य नाङ्गताग्राहकत्वमपि । न च सन्निधिविशेषाम्नानवैयर्थ्यम् । क्रमनियमार्थत्वेन तस्योपपत्तेः । अत एव यत्रोपहोमादौ न प्रकरणान्तरेणार्थवत्ता तत्राङ्गताग्राहकत्वमपि । तत्राङ्गत्वे भिन्नप्रयोगविधिपरिग्रहात् क्रमनियामकत्वानुपपत्तिः । अतः आनन्तर्यस्य अनियामकत्वात् प्रकरणेन हस्तावनेजनस्य करिष्यमाणसर्वपदार्थाङ्गत्वमेव । कतृसंस्कारकत्वेन प्रधानमात्रार्थत्वशङ्कानुपपत्तेः ।

न च मलापकर्षणार्थत्वादस्य पिष्टलेपप्राग्भाविपदार्थाङ्गत्वमेव युक्तमिति न्यायसुधाकृदुक्तं युक्तम् । हस्तावनेजनप्राग्भाविमलापकर्षणार्थस्यास्य पिष्टलेपसम्बन्धिमलनिवर्तकत्वाभावेऽपि सर्वपदार्थाङ्गभूते तन्मलाभावसम्पादकत्वेन सर्वार्थत्वोपपत्तेः । मुष्टीकरणवाग्यमयोस्तु अङ्गुलिवाग्विसर्गप्राक्कालीनत्वेन यजमानकर्तव्यसर्वपदार्थाङ्गत्वमेव, तदुत्तरकर्तव्यपदार्थसम्बन्धिनः प्रधानस्य पृथक्प्रयत्नापेक्षत्वेन एतज्जन्यत्वाभावात् ।

नचैवं तदुत्तरभाविप्रधानाङ्गत्वस्यैवाभावेन कथं प्रधानप्रकरणेनाङ्गमात्रार्थत्वमिति वाच्यम् । आनर्थक्यतदङ्गन्यायेन तदुपपत्तेः। तस्मात् सर्वार्थत्वम् ॥

सूत्रं स्पष्टम् ॥

ननु प्रकरणस्यापि वाक्येन बाधोपपत्तेः कथं सर्वार्थत्वं ?

नह्याख्यातद्वययच्छब्दतुमुन्प्रत्ययाभावे एकवाक्यत्वमेव नास्तीति नियमस्समस्ति । पश्य मृगो धावतीत्यादौ व्यभिचारात्, अत आह—

सू—वाक्यानां च समाप्तत्वात् ॥ ३—१—२५ ॥

दर्शनभावनायाः कर्मसाकाङ्क्षत्वात् धावनभावनायां तस्यां कर्मत्वेनान्वयोपपत्तेः युक्ता तत्रैकवाक्यता । प्रकृते त्ववनेजनभावनानां सत्यप्यपूर्वसाधनत्वलक्षणातात्पर्यग्रहणार्थं भावनान्तरापेक्षणे शाब्दबोधे हस्तादीनामेव कर्मत्वेनान्वयात् विभज्यमानसाकाङ्क्षत्वाभावेनैकवाक्यत्वानुपपत्तेः ।

प्रयोजनमुलपराजिस्तरणस्यारादुपकारकत्वेन प्रधानमात्रार्थत्वात् गृहमेधीये लोपेन हस्तावनेजनस्यापि लोपः पूर्वपक्षे । सिद्धान्ते तु आज्यभागाङ्गत्वेन करणमिति विस्मृतस्यापि हस्तावनेजनादेः उलपराजिस्तरणानन्तरं करणमित्यपि प्रयोजनं द्रष्टव्यम् ॥

इति हस्तावनेजनाधिकरणम् ॥

अथ पञ्चदशमाग्नेयचतुर्धाकरणाधिकरणम् ॥ (१५)

सू—शेषस्तु गुणसंयुक्तस्साधारणः प्रतीयेत मिथस्तेषामसम्बन्धात् ॥ ३—१—२६ ॥

(विषयः)

दर्शपूर्णमासयोः "आग्नेयं चतुर्धा करोति" इति श्रुतम् ।

तत्र किं हविष्ट्वमेव तदुद्देश्यतावच्छेदकं ? अग्निसम्बन्धिहविष्ट्वं वा ? उत पुरोडाशत्वमेव वा ? उताग्निदेवताकहविष्ट्वम् ? इति विचार्यते ।

(सङ्गतिः)

पादाध्यायतङ्गतिःस्पष्टा । सर्वार्थत्वापवादाच्चानन्तरा ।

(पूर्वपक्षः)

अत्र द्वितीयया चतुर्धाकरणं प्रति प्राधान्यात् तद्धितार्थस्योद्देश्यता प्रतीयते। तस्य च सर्वनामार्थकत्वात् स्ववाक्योपात्ताभावे प्राकरणिकपरामर्शित्वावगतेः प्रकृतप्रधानसाक्षात्सम्बन्धिहविर्मात्रोद्देश्यतावगतेः अग्निसम्बन्धित्वरूपविशेषणस्याप्यविवक्षितत्वात् हविर्मात्रस्य च चतुर्धाकरणम् । नह्यत्र परस्परान्वयो व्युत्पत्तिसिद्धः येन विशिष्टोद्देशः शङ्क्येत। (१)पौर्णमास्यधिकरणे द्रव्यदेवतयोः परस्परानन्वयस्य स्थापितत्वात् ।

अस्तु वा कथंचिद्विशेषणविवक्षा, तथापि प्रधानभूतद्रव्यसङ्कोचपरिहारार्थं सम्बन्धसामान्ये तद्धितस्यानुशासनिकीं लक्षणामङ्गीकृत्य अग्निसम्बन्धित्वमात्रं तद्विशेषणम्, (२)'गुणे त्वन्याय्यकल्पने'ति न्यायात् । सम्बन्धस्य च विशेषापेक्षायां हविर्निरूपितदेवतात्वाधिष्ठानत्वकत्वसम्बन्धस्याश्रयणात् सर्वेषां पुरोडाशानां अग्नीषोमीयाज्यस्य "वेद्यां हवींषी"तिवद्वा अग्निसम्बन्ध्यङ्गहविषोऽपि चतुर्धाकरणम् ।

अस्तु वा(३) "तच्चतुर्धा कृत्वा पुरोडाशं बर्हिषदं करोती"ति शतपथश्रुतिगतेन वाक्येन सिद्धान्तवदुपसंहारात् अग्निसम्बन्धिपुरोडाशमात्रस्यैव चतुर्धाकरणम्। आग्नेयपदस्य च पुरोडाशमात्रपरत्वेऽपि शाखान्तरीयत्वादस्य वाक्यस्य नानर्थक्यम्।

अस्तु वा लक्षणाभयादेव आग्नेयमिति देवतातद्धितः । तथाप्यग्नीषोमीयादावप्यस्त्येवाग्नेः देवतात्वमिति तस्यापि चतुर्धाकरणोपपत्तिः । घटपटावानयेत्यादौ कर्मत्वस्यैव द्वन्द्वान्ते श्रुतस्य

१. पू. मी २-२-३. २. पू. मी. ९-३-१५. ३. श. ब्रा. १-८-४

तद्धितार्थस्य प्रत्येकमभिसम्बन्धात् त्यज्यमानद्रव्योद्देशकर्मत्वरूपे देवतात्वे व्यासक्तत्वस्य बाधाच्च । अतश्च डित्थ डवित्थमातुःडित्थमातृव्यपदेशवत् उभयदेवत्यस्याप्याग्नेयपदव्यपदेश्यत्वोपपत्तेः युक्तं पुरोडाशमात्रस्य चतुर्धाकरणम् ।

अस्तु वा व्यासक्तं देवतात्वम् । तथापि प्रधानभूतद्रव्यसङ्कोचपरिहारायाग्निपदं स्वशक्यघटितमधिष्ठानं लक्षयित्वा तन्निष्ठदेवतात्वमेव हविर्विशेषणत्वेनावगमयतीति न कश्चित् पुरोडाशमात्रचतुर्धाकरणे विरोधः । यदि हि प्रमाणान्तरप्रमितसोमादिसापेक्षस्याग्निप्रातिपदिकार्थमात्रस्यानेन देवतात्वमुच्यते ततस्सापेक्षत्वेन तद्धितवृत्तिभङ्ग आपद्येत । अग्निपदेनैव तु मनोतास्थाग्निपदेनेव सोमादेरपि लक्षणायां न कश्चिद्विरोधः ।

अतश्च यथैव(१)"आग्नेयस्य मस्तकं विरुज्य प्राशित्रमवद्यती" त्यस्य सर्वविषयत्वं तथा प्रकृतेऽपीति सिद्धम् ।

सूत्रं तु उद्देश्यविशेषणसंयुक्तश्शेषः साधारणः प्रतीयेत । चतुर्धाकरणाख्यस्य शेषस्याग्नेयोद्देश्यविशेषणस्य मिथस्सम्बन्धाभावादिति व्याख्येयम् ॥

इति पूर्वपक्षः ।

सू—व्यवस्था वाऽर्थ(२)स्य श्रुतिसंयोगात् लिङ्गस्यार्थेन सम्बन्धाल्लक्षणार्था गुणश्रुतिः ॥३–१–२७॥

(सिद्धान्तः)

आग्नेयस्यैव वा चतुर्धाकरणम्, प्रचुरप्रयोगेण देवतामात्रशक्तस्य तद्धितस्य सम्बन्धसामान्यलक्षकत्वानुपपत्तेः । अत एव तदनुशासनमपि लाक्षणिकमेव ।

---

१. आप. श्रौ. ३–१–२. २. अर्थसंयोगादिति भाष्याभिप्रेतः पाठः ।

न च प्रधानभूतसर्वनामार्थकताद्धितार्थद्रव्यसङ्कोचपरिहाराय लक्षणाङ्गीकरणम् । शुक्लः पट इत्यादौ सङ्कोचार्थ एव विशेषणे लक्षणानङ्गीकरणात् । अन्यथा विशेषणमात्रोच्छेदापत्तेः । एतेनाग्निपदेनैव मनोतास्थाग्निपदवत् सोमादिलक्षणेत्यप्यपास्तम् । तत्र केवलाग्निदेवताकत्वाभावेन तदङ्गीकारेऽपि प्रकृते तदङ्गीकारे प्रमाणाभावात् ।

न च देवतावाचित्वाङ्गीकारेऽपि अग्नीषोमीयादौ उभयोरपि देवतात्वसत्वाच्चतुर्धाकरणाविषयत्वोपपत्तिः । इतरेतरयोगरूपचार्थविहितद्वन्द्वेन साहित्यस्य विवक्षितत्वात् सहितयोरेव देवतात्वं प्रत्यन्वयोपपत्तेः । अतएव देवतात्वमप्यखण्डोपाधिरूपम् , न तु त्यज्यमानहविरुद्देश्यत्वमेवेति न व्यासक्तत्वाविघातः । घटपटावानयेत्यत्र उद्देश्यत्वेन तद्विशेषणस्य साहित्यस्याविवक्षितत्वात् प्रत्येकं कर्मतेति विशेषः । अत एव तदभिप्रायेणैव द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यत इति प्रवादः । अतश्चाग्नीषोमीयादावग्नेर्देवतात्वाभावात् केवलाग्निदेवत्यस्यैव चतुर्धाकरणम् ।

यत्तु अग्निदेवताकत्वं प्रकृतद्रव्यविशेषणमविवक्षितमिति, तत्र ब्रूमः—यन्मते सम्बन्धसामान्ये तद्धितः तन्मते तावत्कारकतातिरिक्तसम्बन्धेन परस्परान्वयस्य व्युत्पत्तिसिद्धत्वेन विशिष्टोद्देशे नैव किंचित् बाधकमस्ति । यस्यापि देवतातद्धितस्तस्यापि किमपूर्वसाधनत्वस्य लक्षकं ? प्रकृतद्रव्यमात्रं वा ? प्रकृतहविष्ट्वं वा ? नाद्यः; "सूक्तहविषोरि"ति नियमेन देवतातद्धितस्य द्रव्यमात्रवाचित्वाभावात् । नान्त्यः; हविःपरत्वस्य देवतावाचित्वप्रतीतिं विना अनुपपत्तेः । न हि सूक्ते हविषि वा वाच्ये देवतातद्धितस्तेन नियम्यते । येन हविःपरत्वं प्रथमत एवा-

वबुध्येत । सूक्ते हविषि वा वाच्येऽपि अधीतादितद्धितस्य सम्बन्धसामान्यतद्धितस्य वा दृश्यमानत्वात् । अपि तु देवतातद्धितस्य सतस्सूक्तहविर्वाचित्वनियमः तेन क्रियते । अतश्च उपजीव्यस्य प्रथमावगतस्य देवतात्वस्यैवापूर्वसाधनलक्षकत्वोपपत्तेः तदेव प्रातीतिकमुद्देश्यतावच्छेदकम् । देवतात्वस्य च नियमेनानुयोगिप्रतियोगिसापेक्षत्वात्(१) हविरार्तिन्यायेनाग्नेईविषश्च विवक्षाङ्गीकारात् देवतायाश्च द्रव्यान्वयस्याव्युत्पन्नत्वेऽपि "अर्धमन्तर्वेदि मिनोती"तिवत् तद्धितान्तपदेनाग्निदेवताकहविष्ट्वस्य लक्षणयोद्देश्यतावच्छेदकत्वोपपत्तिः ।

एवं चाग्निदेवताकस्य आज्यभागहविषोऽपि "वेद्यां हवींष्यासादयती"तिवत् चतुर्धाकरणप्रसक्तौ शाखान्तरीयेण "तच्चतुर्धा कृत्वे"ति वचनेन तच्छब्दपरामृष्टपुरोडाशपरेणास्य स्वविषये उपसंहारादग्निदेवताकपुरोडाशमात्रस्य चतुर्धाकरणोपपत्तिः । आज्यभागाङ्गस्यापि वा ध्रौवाज्यस्य सर्वार्थत्वेन प्रतिपत्त्यनर्हत्वात् अनेनैव तस्योपसंहारः । एतादृशोपसंहारे च बीजं विकल्पानापत्तिः, शक्यतावच्छेदकानवच्छिन्नपदार्थलक्षणानुपपत्तिश्च । अन्यथा उपसंहारानङ्गीकारे शाखान्तरीयत्वेऽपि विकल्पापत्तिः । आग्नेयपदस्यैव पुरोडाशमात्रपरत्वलक्षणयोपसंहाराङ्गीकारे तु आग्नेयपदेन शक्यतावच्छेदकानवच्छिन्नाग्नीषोमीयादिलक्षणापत्तिः । अतः पुरोडाशपदस्यैव शक्यतावच्छेदकावच्छिन्नाग्नेयमात्रपरत्वलक्षणया उक्तविधमुपसंहाराङ्गीकरणं युक्तम् । तदा हि सामान्यशास्त्रस्य क्लृप्तत्वेऽपि प्रथमप्रवृत्तिकत्वाभावात् फलतः परिसंख्यावान्तरभेदः तन्मात्रसंकोचरूपोपसंहारोऽङ्गीक्रियत इति न विकल्पापत्तिः ।

---

१. पू. मी. ६—४—९.

नचैवमपि परस्परोपसंहारे द्वयोस्सार्थक्योपपत्तावपि अन्यतरेणान्यतरोपसंहारे सामान्यशास्त्रस्यानर्थक्यम्। 'तं चतुर्धा कृत्वे' त्यत्र तु प्राप्तचतुर्धाकरणोत्तरकालत्वविशिष्टबर्हिषत्त्वकरणकभावनायाः भक्षणाङ्गत्वेन विधानाच्चतुर्धाकरणविध्यभावेन सामान्यविधित्वाभावात् कथमुपसंहार इति वाच्यम् । क्रमविधानार्थमप्यनूद्यमानस्य तेनोपसंहारोपपत्तेः ।

वस्तुतस्तु तस्य शाखान्तरीयत्वात् तच्छाखीयपुरुषान् प्रति चतुर्धाकरणस्यापि विध्युपपत्तिः । नचैवं वाक्यभेदापत्तिः । स्वोद्देश्यसम्बन्धिन्या एव चतुर्धाकरणभावनायाः उत्तरकालतासम्बन्धेनैवोत्तरभावनायां वैशिष्ट्योपपत्तेः । यद्यपि स्वशाखीयवाक्याभावे शाखान्तरीयपुरुषान् प्रति चतुर्धाकरणं प्राप्नोत्येव, तथापि स्वशाखीयवाक्यसत्वे तस्यैवाभ्युदयशिरस्कत्वकल्पनया विधायकत्वकल्पनात् सामान्यशास्त्रत्वोपपत्तिः । एवमेकशाखीयवाक्यद्वयस्थलेऽपि यदि सामान्यवाक्यस्याभ्युदयशिरस्कत्वकल्पनयापि संभवत्प्राप्तिकार्थप्रापणफलकत्वेन सामान्यशास्त्रत्वसंभवः, यथा अनारभ्याधीतसाप्तदश्यवाक्यस्य सामिधेनीसम्बन्धमात्रप्रापकतया तत्रापि युक्तोपसंहारो मित्रविन्दादिप्रकरणस्थसाप्तदश्यवाक्येन । यत्र तु न कथमपि सामान्यवाक्यसार्थक्यं तत्र विकल्प एवागत्याङ्गीक्रियते । तत्रापि वाक्यद्वयप्रमितमभ्युदयकारि भवतीत्येवं कल्पनया उपसंहार एवेत्यन्यदेतत् ।

यत्तु प्राशित्रावदानवत् सत्यप्याग्नेयपदश्रवणे सर्वार्थत्वमित्युक्तम् । तत्प्राशित्रमवद्यतीति सामान्यवाक्येन सर्वहविषां प्राशित्रावदानप्राप्तौ प्रदेशविशेषापेक्षायां आग्नेयस्येतिवाक्येन आग्नेयोद्देशेन मस्तकप्रदेशनियममात्रकरणात् अन्यपरत्वेन सामान्यवाक्योपसंहाराशक्तेः हविरन्तरे प्रदेशानियमाप्राप्तावपि प्राशि-

श्रावदानप्राप्तौ बाधकाभावात् । प्रकृते तु तद्विशेषवाक्यस्यान्यपरत्वाभावेन उपसंहारस्यावश्यकत्वात् सर्वार्थत्वानुपपत्तेः परिहर्तव्यम् ।

अत एवात्र प्राशित्रावदानस्यावान्तरप्रकरणादेव प्राप्तेः तदन्यथानुपपत्त्या च विभागापरपर्यायस्य विरुजनस्यापि प्राप्तेः तदनूद्य मस्तकमात्रमाग्नेयोद्देशेनापादानत्वेन विधीयते । अत एव द्वितीयया विभागसंस्कार्यतया प्रतीयमानस्यापि मस्तकस्य दृष्टार्थत्वाद्यनुरोधेनापादानत्वलक्षणायामपि न दोषः ।

अस्तु वा आग्नेयमस्तकापादानकस्य विभागस्यैव प्राशित्रावदानोद्देशेन विधिः । स्फोटनापरपर्यायो विभागो नार्थप्राप्तः । अस्मिंश्च पक्षे विधेयसामर्थ्यादेव प्राशित्रावदानस्याग्नेयमात्रविषयस्योद्देश्यत्वावगमेऽपि न तस्योत्पत्तिवाक्येऽपि तन्मात्रविषयत्वमित्यन्यत्र विस्तरः ॥

सूत्रं तु आग्नेय एव चतुर्धाकरणव्यवस्था । देवतात्वरूपस्यार्थस्य तद्धितश्रुतिसंयोगात् ।

न चास्यापूर्वसाधनत्वपरिचायकत्वमात्रतया स्वरूपस्याविवक्षितत्वादनादरः । लिङ्गत्वेऽप्यर्थेनापूर्वसाधनत्वेनान्यूनानतिरिक्तवृत्तितया सम्बन्धात् । प्राशित्रावदानवाक्ये तु आग्नेयपदस्य मस्तकोपलक्षणार्थत्वात् न तस्य व्यवस्थेति व्याख्येयम् । प्रयोजनं स्पष्टम् ॥

इति पञ्चदशमाग्नेयचतुर्धाकरणाधिकरणम् ॥ १५ ॥

श्रीरुद्रदेवसूनोः कृतिरेषा खण्डदेवस्य ।
मीमांसाकौस्तुभाख्या शेषाध्याये पाद आद्योयम् ॥

इति पूर्वोत्तरमीमांसापारावारपारीणश्रीरुद्रदेवसूनोः
खण्डदेवस्य कृतौ मीमांसाकौस्तुभे
तृतीयाध्यायस्य प्रथमः पादः ॥
श्रीरस्तु

श्रीः

मीमांसाकौस्तुभे ।

तृतीयाध्यायस्य द्वितीयः पादः ॥

सू-अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावस्स्यात् तस्मादुत्पत्तिसम्बन्धोऽर्थेन नित्यसंयोगात् ॥ ३-२-१ ॥ (सि)

(विषय संशयौ)

एवं श्रुतिविनियोगोपयोगिविचारे समाप्ते इदानीं श्रुत्युपजीविलिङ्गविनियोगोपयोगीविचारः प्रारभ्यते ।

लिङ्गं नामाङ्गत्वघटकीभुतपरोद्देश्यताकृतिकारकत्वान्यतरवाचकपदकल्पनानुकूला कॢप्तपदार्थनिष्ठा योग्यता । यथा 'स्रुवेणावद्यती'त्यत्र कॢप्तपदार्थनिष्ठा द्रवमित्युद्देश्यवाचिपदकल्पनानुकूला योग्यता लिङ्गम्, यथा वा संस्कारविध्यन्यथानुपपत्त्या संस्कार्यस्य विनियोगकल्पनास्थले द्रव्यनियामकपदकल्पनात् कृतिकारकत्ववाचिपदकल्पनानुकूला कॢप्तसंस्कारनिष्ठा योग्यता लिङ्गम् ।

यद्यपि च तत्रोद्देश्यवाचकमपि पदं कल्प्यते तथापि कृतिकारकत्ववाचिपदस्य तावत् कल्पनान्न क्षतिः ।

एवं मन्त्रेष्वपि कॢप्तेषु स्वप्रतिपाद्यार्थं प्रत्युद्देश्यताप्रतिपा-

दकपदकल्पनानुकूलास्ति योग्यता । अतस्साऽपि लिङ्गम् । सा चान्यथानुपपत्तिरूपत्वाद्व्यतिरेकव्याप्तिरूपा । तच्च तत्पदरूपश्रुतिकल्पनाद्वारा तत्तत्पदार्थं प्रति क्लृप्तपदार्थस्य तत्पदार्थस्य वा पदार्थान्तरं प्रति विनियोगे कारणम् । तत्र च वस्तुसामर्थ्यरूपस्य लिङ्गविशेषस्य विचारासम्भवेनैतावतैव प्रायशः पर्यवसानम् । मन्त्रसामर्थ्यरूपे तु विचार्यते—किं तेन शक्त्यैव प्रतिपाद्यमानेऽर्थे विनियोगः ? किं वा लक्षणया विनियोगो ? गौण्या वा प्रतिपाद्यमानेऽपीति ।

(सङ्गतिः)

लिङ्गप्रयोज्यविनियोगोपयोगिचिन्तनस्य पादार्थत्वात् पादाध्यायसङ्गतिस्स्पष्टा । अनन्तरा तु युक्तं प्रत्यक्षश्रुतेर्विशेषनिष्ठत्वादसर्वविषयत्वं चतुर्धाकरणस्य, लिङ्गस्य तु न तथात्वमिति पूर्वपक्षोत्थापनात् द्रष्टव्या ।

(पूर्वपक्षः)

तत्र दर्शपूर्णमासादिप्रकरणे समाम्नातानां श्रुत्यविनियुक्तानां मन्त्राणामधिकाराख्यप्रकरणात् क्रतुसम्बन्धेऽवगते द्वारविशेषे मन्त्रलिङ्गेन विनियोगः क्रियते । तत्रापि योग्यतारूपस्य लिङ्गस्य सत्यपि देवदत्तस्य पाकयोग्यत्वे आकाङ्क्षाभावे पाके विनियोगादर्शनात् आकाङ्क्षापि सहकारिणी । सा च यथैव मन्त्रप्रकरणिनोः, तथा द्वारस्यापि, तदभावेऽपि सम्बन्धानुपपत्तेः ।

एवं च यथैव मुख्यस्य कुशच्छेदनस्य स्मारकापेक्षायां तदुक्तत्वेन मन्त्रो "बर्हिर्देवसदनं दामी"त्ययं विनियुज्यते, यथा गौणस्याप्युलपाख्यसुगन्धितृणविशेषच्छेदनस्य स्मारकापेक्षायां विनियुज्यत एव । न हि प्रतिप्रधानं गुणावृत्तिर्विरुध्यते ।

न च जघन्यवृत्तिजन्यशाब्दबोधे मुख्यार्थबाधस्यापि कारणत्वात् कथं तदभावे गौणेऽर्थे विनियोग इति वाच्यम् । "यष्टीः प्रवेशय" 'छत्रिणो गच्छन्ती' त्यादौ तदभावे तात्पर्यमात्रेण जघन्यवृत्तिदर्शनेन तात्पर्यानुपपत्तेरेव तत्कारणत्वावसायात् प्रकृते च गौणार्थविषयकस्मारकाकाङ्क्षाया एव तात्पर्यग्राहकत्वात् तस्मिन् विनियोगोपपत्तेः । अत एव मन्त्रस्य मुख्यार्थविनियोगेन निराकाङ्क्षस्यापि न क्षतिः ।

न च गौणार्थस्मारकाकाङ्क्षाया ध्यानाद्युपायान्तरेण निवृत्तिः।आकाङ्क्षायास्तात्पर्यग्राहकत्वमात्रेणाप्युपपत्तावनुपस्थितध्यानाद्याक्षेपकत्वे प्रमाणाभावात् , वृत्तिप्रमापितप्रतिमन्त्रानियमस्याङ्गत्वमित्येकस्यैव विनियोगस्य कल्पनोपपत्तौ ध्यानादीनां तत्कल्पने गौरवाच्च । अत एव गौणमुख्यार्थभेदेन विनियोगकल्पनात् पूर्वपक्षेऽपि गौरवमित्यपास्तम् । तस्मात् सर्वत्र विनियोगः ।

एवं च दर्शपूर्णमासप्रकरणपठितानां पूषानुमन्त्रणमन्त्रादीनां प्रकरण एव गौण्या वृत्त्या निवेशोपपत्तेरुत्कर्षोऽपि नाश्रितो भवति ।

न च मन्त्राणां गौणार्थाकाङ्क्षायां वृत्तिप्रमाप्यप्रत्यङ्गत्वकल्पनेऽपि प्रकृतेऽग्न्यादिरूपस्य गौणार्थस्य संनिहितमुख्यमन्त्रान्तरेण निराकाङ्क्षत्वात् कथं तत्र पूषानुमन्त्रणमन्त्रस्य गौणस्य निवेश इति वाच्यम् । प्राकरणिकेऽन्यदेवताकेऽनाम्नातमन्त्रके वा कर्मणि निवेशोपपत्तेस्तत्रानुपस्थितध्यानाद्युपायाक्षेपापेक्षयोपस्थितपूषानुमन्त्रणमन्त्रनिवेशकल्पनस्यैवौचित्यादि-

ति प्राप्ते—

(सिद्धान्तः,)

अभिधीयते-मुख्य एवार्थे मन्त्राणां विनियोगः, तत्रैव मन्त्रप्रकरणिद्वाराकाङ्क्षामात्रसहकृतेन लिङ्गेन शीघ्रं श्रुतिकल्पनात्। जघन्यार्थविषये तु तात्पर्यग्रहाख्यकारणापेक्षत्वेन श्रुतिकल्पने विलम्बितत्वम् ।

न च गौणार्थनिष्ठाकाङ्क्षयैव तात्पर्यग्रहः । तस्याः ध्यानादिमुख्योपायान्तरेणैव निवृत्तिसिद्धेः ।

न चाक्षेपकत्वकल्पनागौरवभिया क्लृप्तमन्त्रग्राहकत्वम् । ध्यानादीनामपि स्मृतिकारणतया क्लृप्तानां कारणत्वस्यानाक्षेपात् । अनुष्ठानाक्षेपस्य तु मन्त्रेऽपि तुल्यत्वाच्च ।

न च गौणमुख्यार्थनिष्ठाकाङ्क्षयोर्मन्त्रनियामकत्वे विनिगमनाविरहः; गौणार्थशाब्दबोधं प्रति शक्यसम्बन्धग्रहस्य हेतुत्वेन शक्योपस्थितेः प्राथमिकत्वात् कर्तृनिष्ठाकांक्षाया एव मन्त्रनियाकत्वोपपत्तेः । अतश्च मुख्यसम्बन्धेन निराकाङ्क्षस्य मन्त्रस्य न पश्चादुपस्थितेन गौणेन सम्बन्धः, अन्यतराकाङ्क्षाहेतुकस्वसम्बन्धस्योभयाकाङ्क्षाहेतुकस्वसम्बन्धापेक्षया दौर्बल्यात् ।

न च विकृत्साकाङ्क्षावदन्यतराकांक्षाया अप्यनन्यथासिद्धत्वाद्विनियोजकत्वम् , ध्यानाद्युपायान्तरेणापि गौणार्थविषयकस्मृतिसिद्धेरुक्तत्वात् । अत एव ध्यानादिमुख्योपायान्तरासम्भवे गौणोपायान्तरसाधारण्येनैतन्मन्त्रस्यापि कदाचित्प्राप्तिसंम्भवेऽपि नैतन्मन्त्रनियामकत्वम्, मन्त्राम्नानान्यथानुपपत्तेः तन्नियमकारणस्य प्रथमावगतमुख्यार्थविनियोगेनैवोपशान्तत्वात् ।

एवं च यत् पूर्वपक्षे गौणमुख्यसाधारण्येनैकैव श्रुतिः क-

ल्प्यत इत्युक्तम्, तत् कल्पनयोश्शीघ्रमन्थरप्रवृत्तत्वेनैककाल्प्रवृत्तिकत्वाभावादपास्तम्।

वस्तुतस्तु उद्देश्ययोस्समकालोपस्थितावप्याग्नेयादिषु प्रयाजादीनां प्रत्येकमेव श्रुतिकल्पनेति वक्ष्यते। तस्मान्मुख्यमात्रार्थत्वम्।

सूत्रं तु शक्यसम्बन्धग्रहसापेक्षत्वेन मुख्यार्थाभिधानसंयोगात् खलु गौणार्थशेषताभावे तत्। ततश्च प्रथमावगतेन मुख्येनैव सम्बन्धो युक्तः। स्वेनैवार्थेन नित्यं प्रमाणान्तरमनपेक्ष्य मन्त्राणां संयोगादिति व्याख्येयम्॥

सू—संस्कारत्वादचोदिते न स्यात्॥ ३—२—२॥

यत्त्वेवं सति पूषानुमन्त्रणमन्त्रादीनामुत्कर्षः प्रसज्येतेत्युक्तम्, तदुत्कर्षस्य गुणत्वादप्रयोजकम्। न हि लिङ्गेन प्रकरणबाध उत्कर्षो दोषः।

न च सामान्यसम्बन्धबोधकप्रमाणाभावः। यागानुमन्त्रणसमाख्याया एव तत्त्वात्।

न च प्रकरणादिनापि तात्पर्यग्रहे लोके मुख्यार्थत्वादर्शनात्कथमुत्कर्षकल्पनेति वाच्यम्। दूरस्थस्यापि साकांक्षस्य कथञ्चिदुपस्थितिसत्वे मुख्योपायान्तरनिराकांक्षसंनिधिरूपस्य प्रकरणस्य तात्पर्यग्राहकत्वादर्शनात्। अत एव व्यवहितपदान्वयवत् व्यवहितवाक्यान्वयोऽपि ग्रन्थव्यवहारादौ लोके दृष्टः। यदि तु कथञ्चिल्लोके ईदृशविषयेऽपि गौणप्राकरणिकार्थग्रहणं दृश्येत तदा वक्तृविवक्षायाः प्रकारान्तरेण ज्ञाने सतीति ध्येयम्।

न च प्रकरणे पाठवशात्प्रकरणिनो श्राव्यमानेनानेन कथमुपकर्तव्यमित्याकांक्षैव गौणार्थतात्पर्यग्राहिकास्त्विति वाच्यम्। तस्या अप्यनिर्धारितद्वारिकायाः क्लृप्तद्वारकेण दूरस्थेनाप्यन्वयोपपत्तौ तद्ग्राहकत्वे प्रमाणाभावात् । अत एव प्रकरणपाठोऽपि पारायणाद्युपयोगी तादृशक्रमसिद्ध्यर्थं न नान्तरीयकाकांक्षोत्तेजकम् । इदं चोत्कर्षाभिधानं प्रकरणे मुख्यार्थविरोधिगुणान्तरसत्त्व एव ज्ञेयम् । तदभावे तु क्लृप्तमुख्यार्थविध्यभावेऽपि मान्त्रवर्णिकमुख्यार्थविधिकल्पनोपपत्तेः ।

अत एवोपांशुयाजादेर्याज्यानुवाक्यामन्त्राणां नोत्कर्षः । ततश्चायमत्र क्रमः—मुख्यार्थविधिसत्त्वे तत्रैव विनियोगः । तदभावे मान्त्रवर्णिकमुख्यार्थविधिकल्पनम्, विरोधिगुणसत्त्वे तूत्कर्षः । तस्यापि सामान्यसम्बन्धबोधकप्रमाणाभावेनासंभवे प्रकरण एव गौणार्थविषयकत्वकल्पनम् । तस्याप्यनुपयुक्तलक्षणाद्यसम्भवादिनाऽसम्भवे तदर्थाभिधानस्यैवादृष्टार्थत्वकल्पनया जपरूपत्वाङ्गीकरणमिति ॥

सूत्रं तु विरोधिनि गुणे चोदिते सति यत्र गुणश्चोदितः तत्रोत्कर्षाभिधानं न दोषस्स्यात् । लिङ्गेन सामान्यसम्बन्धग्राहकप्रमाणसहकृतेन मुख्यार्थसंस्कारकत्वस्यैवावगमादिति व्याख्येयम् । प्रयोजनं स्पष्टम् ॥

इति प्रथमं लिङ्गाधिकरणम् ॥

अथ द्वितीयमैन्द्र्यधिकरणम् (२)॥

सू—वचनात्त्वयथार्थमैन्द्री स्यात्॥ ३—२—३॥

(विषयः)

अग्नौ श्रुतं—"कदाचन स्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठत" इति।

(संशयः)

तत्र किमयं मन्त्रः मुख्यसामर्थ्योपष्टब्धतद्धितश्रुत्या इन्द्राङ्गम्? उत गौणसामर्थ्योपष्टब्धकारकश्रुत्या गार्हपत्याङ्गमिति विचारः।

(सङ्गतिः)

तत्र गौणसामर्थ्यस्य विनियोजकत्वाभाववद्विनियोजकश्रुतिसहायत्वरूपविनियोगप्रयोजकत्वाभावस्यापि पूर्ववत्प्रसक्तस्यापवादकरणात् पादाध्यायानन्तरसङ्गतयः।

यत्तु भाष्यकारेण "निवेशनस्सङ्गमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठत" इत्युदाहृतम्। तत् "विश्वा रूपाऽभिचष्टे शचीभिः। देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे वसूना"मिति मन्त्रशेष उपमार्थेन नकारेणेन्द्रस्योपस्थानतया गुणत्वेन सङ्कीर्तनादग्रे च "वसूनां पावकश्चास्मी"ति वसुश्रेष्ठत्वकथनेन प्राधान्यावगतेः मुख्यसामर्थ्यस्यैव कारकश्रुत्युपष्टम्भकतया स्वस्यैव स्वोपमानेन कथञ्चिद्गौणसामर्थ्यस्य च तद्धितश्रुत्युपष्टम्भकतया च वैपरीत्यादुपेक्षितम्।

न च तद्धितश्रुतिदौर्बल्य एव तर्ह्यस्तूदाहरणता। तस्य बलाबलाधिकरणसिद्धत्वेनैतदधिकरणविषयत्वाभावात् गौणसामर्थ्यस्य विनियोजकश्रुत्यसाहयतामात्रत्वेनैतदधिकरणविषयः। अत एव

न तेन पौनरुक्त्यमपि । अतः पूर्वोक्तमेवोदाहरणम् ।

(पूर्वपक्षः)

तत्र पूर्ववदिहापि तात्पर्यज्ञानस्य लक्षणादिजन्यशाब्दबोधे कारणत्वेन तद्ग्राहकाभावान्न गौणसामर्थ्यस्य द्वितीयाश्रुतिसहायत्वम् ।

न च द्वितीयाप्रमितविनियोगस्यैव तात्पर्यग्राहकत्वम्, शाब्दबोधे योग्यताज्ञानस्य कारणत्वेन गौणसामर्थ्यज्ञानाभावे विनियोगप्रमाण एवानुपपत्तेः, प्रथमोपस्थितैन्द्रतद्धितश्रुत्या इन्द्राङ्गत्वस्यैवावगमेनायोग्यतानिश्चयस्य प्रतिबन्धकत्वाच्च ।

न च प्राथमिकत्वेऽपि तद्धितश्रुतेः कारकश्रुतितो दौर्बल्यम्, तद्धितस्यापि प्राधान्येन मन्त्रप्रतिपाद्यत्वरूपे देवतात्वे शक्तत्वेन दौर्बल्ये प्रमाणाभावात् । अत एव श्रुतिलिङ्गाधिकरणन्यायेन केवलस्य लिङ्गस्य दौर्बल्येऽपि तद्धितश्रुत्यानुकूल्यादिन्द्राङ्गत्वोपपत्तिरिति विशेषाशङ्कासत्त्वान्न तेन पौनरुक्त्यम् ।

अतश्च मन्त्रे गौणत्वस्य तात्पर्यग्राहकाभावात् प्रत्युत द्वितीयान्तपद एव जघन्यवृत्त्याश्रयणे तद्धितश्रुतेस्तात्पर्यग्राहिकायास्सत्त्वात् तत्रैव तदाश्रयणं तेन द्वितीयैव प्रतियोगित्वलक्षिका गार्हपत्यसमीपे स्थितेन्द्रं प्रकाशयेदिति 'गुणे त्वन्याय्यकल्पने' ति न्यायाद्गार्हपत्यप्रातिपदिकमेवेन्द्रे गौणम्, यज्ञसाधनत्वसादृश्यात् ।

अथ वा गार्हपत्यप्रातिपदिकं गृहपतेरयमिति व्युत्पत्त्या इन्द्रे यौगिकमस्तु रूढिबलीयस्त्वात् अग्नेरेव कर्मत्वं तत्तु न मन्त्रसाध्याभिधानं प्रति । तस्याशाब्दत्वेनान्वयानुपपत्तेः । अपि तु धातुवाच्यसमीपावस्थानं प्रति ।

न च प्रकाशनक्रियातिरिक्तक्रियायां मन्त्रस्य करणत्वा-

संभवात्तस्मिन्नन्वयानुपपत्तिः, (१)'उपान्मन्त्रकरणे' इत्यनेनोपपूर्वात्तिष्ठतेर्धातोर्मन्त्रकरणके प्रकाशनाख्ये व्यापारे वर्तमानादात्मनेपदविधानेन प्रकाशनपरत्वाभावे आत्मनेपदानुपपत्तिश्चेति वाच्यम् । (२)"प्रकाशनस्थेयाख्ययोश्चे"ति पूर्वसूत्रेणैव प्रकाशनार्थात्तिष्ठतेरात्मनेपदविधानेनैतत्सूत्रे प्रकाशनव्यतिरिक्तस्यापि व्यापारस्य मन्त्रकरणकत्वे आत्मनेपदविध्यर्थत्वात् । अतश्च समीपस्थितावेव मन्त्रः करणम् ।

न च बाधः । एतत्स्मृतिबलेनैव समीपस्थितेरभिधानप्रयोजनकत्वात्सायादैन्द्रमन्त्रस्यापि समीपस्थितिसाध्येन्द्राभिधानकरणत्वेन समीपस्थितावौपचारिककरणकत्वोपपत्तेः । अत एव स्वसाध्येन्द्राभिधानसाधकत्वस्य सम्बन्धविधयैव भानोपपत्तेर्न धातोरभिधानलक्षणापि । अतश्च वाच्य एव व्यापारे मन्त्रस्य करणत्वमग्नेश्च कर्मत्वम् ।

न च वाच्यस्य तिष्ठतिधात्वर्थस्याकर्मकत्वात् कथं तत्राग्नेः कर्मत्वेनान्वयः । (३)'अकर्मकाच्चे' त्युत्तरसूत्रेणाकर्मकात्तिष्ठतेरात्मनेपदविधानेनास्मिन् सूत्रे तिष्ठतिवाच्यस्याप्यर्थस्य सामीप्यरूपफलावच्छेदेन सकर्मकत्वविवक्षणात् । एवं सामीप्यस्य प्रतियोगितासम्बन्धेनाग्न्याश्रयत्वादग्नेस्स्थितिकर्मत्वोपपत्तिः । तस्मात् द्वितीयाश्रुतेरन्यथाप्युपपन्नत्वाल्लिङ्गेन तत्सहकृततद्धितश्रुत्या वा इन्द्रप्रकाशकत्वमेव मन्त्रस्येति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—द्वितीयाश्रुत्या गार्हपत्यार्थत्वावगमेन नात्र पु-

---

१ पा. सू. १-३-२५. २ पा. सू. १-३-२३. ३ पा. सू. १-३-२६.

स्थार्थकत्वम् ।

न च योग्यताज्ञानाभावाच्छ्रौतविनियोगानुपपत्तिः । अयोग्यतानिश्चयाभावमात्रेण शाब्दबोधोपपत्तौ योग्यताज्ञानस्य कारणत्वकल्पने प्रमाणाभावात् । अतस्सामग्रीसत्त्वेन श्रौतविनियोगोपपत्तेः तस्यैव बलवतस्तात्पर्यग्राहकस्य सत्त्वेन मन्त्रगतेन्द्रपदस्य यज्ञसाधनत्वसादृश्यादिन्दातिधात्वर्थानुसाराद्वाग्नौ जघन्यवृत्त्याश्रयणम् ।

न च तद्धितश्रुत्या द्वितीयाश्रुतेर्बाधः । तद्धितात्तस्यापि प्राधान्येन प्रतिपाद्यत्वरूपस्य देवतात्वस्य मन्त्रं प्रति गुणत्वेनोपस्थितत्वाद्विपरीतविशेषणभावकल्पनां विना तद्धितेन झटिति द्वितीयावन्मन्त्रस्येन्द्राङ्गत्वप्रमाणानुपपत्तेः, इन्द्रोद्देशेन मन्त्रविधावेकप्रसरताभङ्गापत्तेश्च, मन्त्रस्येन्द्रसम्बन्धे समीपास्थितिं प्रत्यविशेषणत्वेन तां प्रति मन्त्रवैशिष्ट्यासम्भवाद्विशिष्टविध्यसम्भवेन प्रत्येकं गार्हपत्योद्देशेन समीपास्थितिविधौ वाक्यभेदादात्मनेपदविरोधापत्तेश्च, चयने इन्द्रस्यानुपयोगेनोद्देश्यत्वानुपपत्तेश्च ।

एतेन तद्धितस्य स्वतो विनियोजकत्वाभावेऽपि गार्हपत्यपदे लक्षणातात्पर्यग्राहकत्वमात्राङ्गीकरणान्न वाक्यभेदादिदोष इत्यपास्तम् । अनुपयोगीन्द्रप्रकाशनार्थत्वानुपपत्तेः, विना कारणं विधौ लक्षणाङ्गीकारे प्रमाणाभावाच्च तद्धितस्य शक्यार्थबोधकालीनेन्द्रप्रकाशकत्वानुवादमात्रत्वेन लक्षणां विनाप्युपपत्तेः । गार्हपत्यपदस्यावयवयोगेनेन्द्रपरत्वपक्षे रूढित्यागापत्तेश्च । समीपास्थितिं प्रत्येव गार्हपत्यस्य कर्मतेति पक्षस्तु मन्त्रस्यौपचारिककरणत्वापत्तेः समीपस्थितेश्च गार्हपत्यसंस्कारार्थत्वे इन्द्राभिधानार्थत्वायोगान्मन्त्रस्य तद्द्वारौपचारिककरणत्वस्याप्यनुपपत्ता-

वात्मनेपदानुपपत्तेः आत्मनेपदानुरोधेन वेन्द्राभिधानार्थत्वा-ङ्गीकारे गार्हपत्यस्य सक्तुवदनीप्सितकर्मत्वायोगात्, ईप्सितक-र्मत्वाङ्गीकारे चोद्देश्यानेकत्वनिमित्तवाक्यभेदापत्तेरयुक्तः । तस्मात् द्वितीयान्ततृतीयान्ते च पदे यथाश्रुते एवाङ्गीकृत्य धातुनैव समीपावस्थानविशिष्टमभिधानमात्मनेपदरूपतात्पर्यग्राहकानुरोधेन लक्षयित्वा तत्रैव मन्त्रस्य करणत्वेन गार्हपत्यस्य च कर्मत्वेना-न्वयोऽङ्गीक्रियते । गार्हपत्यस्य च साधनत्वेन चयने उपयोगा-भावेऽपि संस्कार्यत्वेन तत्सत्त्वादभिधानकर्मत्वोपपत्तिः । तस्मा-द्गौणे गार्हपत्य एव मन्त्रस्य श्रुत्या विनियोगाद्युक्तमेव गौण-सामर्थ्यस्य तदुपष्टम्भकत्वम् ॥

सूत्रं स्पष्टम् ॥

सू—गुणादप्यभिधानं स्यात् सम्बन्धस्याशास्त्रहे-तुत्वात् ॥ ३-२-४ ॥

नन्वस्तु श्रुत्या गार्हपत्ये विनियोगः, तथापि न गौण-त्वाश्रयणम् । श्रुतिशास्त्रस्य शक्तिरूपसम्बन्धतात्पर्यग्रहहेतुत्वे-नाप्युपपत्तेः । अतश्च मुख्यवृत्त्यैव श्रौतविनियोगनिर्वाहे न गौण-त्वाश्रयणमित्याशङ्क्याह—लोकप्रसिद्धगौणवृत्त्याऽप्यभिधानोपप-त्तावन्यपरस्यालौकिकशक्तितात्पर्यग्राहकत्वकल्पनाप्रमाणाभावे-न गौणाभिधानमेव न्याय्यमिति ।

प्रयोजनं स्पष्टम् ॥

इति द्वितीयमैन्द्र्यधिकरणम् ॥

अथ तृतीयं हविष्कृदाह्वानाधिकरणम् ॥ (३)

सू—तथाह्वानमपीति चेत् ॥ ३—२—५ ॥ (पू)

(विषयसंशयौ)

दर्शपूर्णमासयोः "हविष्कृदेहीति त्रिरवघ्नन्नाह्वयती"ति श्रुतम् । तत्र किं हविष्कृदेहीति मन्त्रो वाक्येन गौणेऽवघाते विनियुज्यते? लिङ्गेन वा मुख्य एवाह्वाने? इति विचारः ।

(सङ्गतिः)

गौणसामर्थ्यस्य श्रुतिसहायत्ववत् प्रबलवाक्यसहायत्वस्यापि प्रसक्तस्य वाक्यविनियोगसिद्धापवादकरणात् पादाध्यायानन्तरसङ्गतयः ।

(पूर्वपक्षः)

तत्र नाह्वानाङ्गं मन्त्रः । "पत्न्येव हविष्कृदुपोत्तिष्ठति देवानृषीन् पितॄन् साऽभिद्रुत्यावहन्ती"तिवचनेनावघातस्य पत्नीकर्तृकत्वेऽपि पत्नी स्वयमेवोपोत्तिष्ठति न त्वाहूतेत्येवकारेण पक्षप्राप्ताह्वानाभावनियमप्रतीतेराह्वानविध्यन्तरस्य चानन्यथासिद्धस्याभावात् मन्त्रस्य तदङ्गत्वानुपपत्तेः ।

अत एव तत्र त्रिरभ्यासविधिः, सहायार्थत्वात्, तस्य च प्राप्तावघातकालानुवाद इत्यपास्तम् । विना कारणं काललक्षणायां प्रमाणाभावाच्च । अतो(१) "लक्षणहेत्वोः क्रियायाः" इतिशतृप्रत्ययस्य प्रयोजकत्वापरपर्याये हेतौ स्मृते"रभिचरन् यजे-ते"तिवन्मन्त्रपाठस्यावघातभावनाङ्गत्वमेव । व्युत्पन्न 'ओदनं भुञ्जानो गच्छती'त्यादौ शतृप्रत्ययोपात्तक्रियायामपि सुबन्तान्वयः।

न चैवं प्राप्तावघातोद्देशेन मन्त्रत्रिरभ्यासयोर्विधौ वाक्यभेदापत्तिः । अवघातक्रियाया वितुषीभावफलकत्वावश्यंभावेन

---

१ पा. सू. ३-२-१२६

तत्र त्रिरभ्यासविध्यनुपपत्तेः । शाखान्तरे त्रिरभ्यस्तस्यैव मन्त्रस्य पठितत्वेन त्रिरित्यस्यानुवादात् तदनापत्तेः ।

वस्तुतस्तु अवघाते समाख्याप्राप्तस्याध्वर्योर्वाचनिकेन पत्नीकर्तृकत्वेन बाधादवघ्नन्निति पुंस्त्वस्यापि विधेयत्वापत्तेः मन्त्रपुंस्त्वोभयविशिष्टावघातविधिरेवायम् ।

एवं च पत्नीवाक्येऽपि गुणादवघातान्तरविधिरेव । द्वयोस्तयो 'व्रीहीनवहन्ती' त्यनेन संस्कार्यसम्बन्धेऽपि दृष्टार्थत्वाद्विकल्पः । अत एव पत्नीकर्तृकावघाते "अवरक्षो दिव" इति मन्त्रोऽपि निरवकाशः । प्रकृतवाक्यविधेयस्य विशिष्टावघातस्य विधायकस्त्वाह्वयतिपरः प्रत्यय एव । धातुराख्यातांशश्च साधुत्वार्थमनुवादौ, आख्यातांशस्य "तत्करोति तदाचष्टे" इत्येवंप्रकाशनार्थत्वमङ्गीकृत्य मन्त्रेणाध्वर्युराह्वानमाचष्टे इत्येवं शक्यार्थबोधकालीनाह्वानप्रकाशनस्य प्राप्तस्यानुवादात् । अतो मन्त्र पुंस्त्वविशिष्टावघातभावनैव शतृप्रत्ययोपात्ता विधीयत इति मन्त्रस्य गौणावघाताङ्गत्वमेव । गौणीवृत्तिप्रकारश्चावघातेऽपि कथञ्चित् स्थाली पचतीतिवत् कर्तृत्वमुपचर्य, अचेतनेऽपि चेतनत्वमारोप्य हेऽवघात ! त्वमेहि सम्पन्नो भव इत्यर्थाङ्गीकारेण द्रष्टव्यः ।

सूत्रं आह्वानशक्तोऽपि हविष्कृदेहीति मन्त्रः तथा ऐन्द्रीवदयथार्थे विनियुज्यते इति व्याख्येयम् ॥

(इति पूर्वपक्षः)

सू–न कालविधिश्चोदितत्वात् ॥३–२–६ ॥ (सि)

(सिद्धान्तः)

नात्र गौणेऽवघाते मन्त्रस्य विनियोगः । वचनस्य मुख्याह्वानसम्बन्धानुवादकत्वेनाप्युपपत्तेः । मुख्यविशेष्यभूताह्वानभाव-

नासम्बन्धस्याभ्यर्हितत्वाच्च त्रिरित्यस्यावघातेऽन्वयानुपपत्तेर- श्रुतमन्त्रपाठक्रियाविषयत्वापत्तेश्च । विना कारणमाख्याते आनुशासनिकथा अपि प्रकाशनलक्षणाया धातोस्साधुत्वपारार्थ्य- विशिष्टार्थविध्यादेश्चान्याय्यत्वाच्च ।

नचैवकारेणाह्वानस्य पर्युदासात् तत्र मन्त्रादिसम्बन्धानुप- पत्तेस्सर्वदोषाङ्गीकरणम् । तत्रेतरस्य सर्वस्य प्राप्तत्वेनावघाता- नुवादेन पत्नीमात्रविधानादेवकारार्थविशिष्टपत्नीकर्तृकावघाता- न्तरविधौ गौरवविकल्पाद्यापत्तेः । अत एव 'पत्न्येव हविष्कृदु- पोत्तिष्ठती' त्यत्र पत्न्येव हविष्कृत् न त्वन्येत्येवकारार्थो, न तु पत्नी स्वयमेवोपोत्तिष्ठति न त्वाहूतेत्येवकारार्थः ।

न चैवमनाहूताया अपि स्वपदार्थकरणोपपत्तेराह्वानस्य नित्यप्राप्त्यभावात् कथं तत्र मन्त्रसम्बन्धानुवाद इति वाच्यम् । मन्त्रस्यावघातावान्तरप्रकरणे पठितस्य तत्सम्बन्धनिर्वाहार्थं "बाहुभ्यां सध्यास" मित्यादिमन्त्रवन्मान्त्रवर्णिकक्रियानियम- विधिकल्पकत्वोपपत्तेः ।

अत एव नित्यप्राप्तत्वेऽपि चयनादिवदध्वर्युकर्तृकत्वसिद्ध्यर्थं विधिरिति न्यायसुधोक्तमपास्तम् । विधेयान्तरसत्त्वेन संभव- त्प्राप्तिकायाः क्रियायाः विधौ गौरवात् , मन्त्रपाठस्याध्वर्युकर्तृ- कत्वसिद्धौ पृथक्प्रयत्नानापाद्ये आह्वाने ऽध्वर्युकर्तृकत्वस्यार्थ- सिद्धत्वाच्च । प्रथनस्य तु विधेयान्तराभावात् पृथक् प्रयत्नापाद्य- त्वेनाध्वर्युकर्तृकत्वासिद्धेश्च विधिरिति विशेषः । तेनावघातार्थं त- त्काले आह्वानस्य तत्र च मन्त्रस्य नित्यप्राप्तस्यानुवादात् केवल- माह्वाने त्रिरभ्यासमात्रमस्यां शाखायां विधीयते । आह्वानस्य मन्त्रपाठातिरिक्तप्रयत्नानापाद्यत्वेन च नात्र वेदिप्रोक्षणमन्त्रव- दाह्वानमन्त्रस्य सकृत् पाठप्रसङ्गः । अवघ्नन्निति तु शतृप्रत्ययस्य

लक्षणार्थत्वात् 'शयाना भुञ्जते यवना' इतिवदवघातकर्तृत्वावस्थस्याह्वानकर्तृत्वप्रतीतेरवघाते च पत्नीकर्तृकत्वेनाध्वर्युकर्तृकत्वाभावेऽप्यन्वारम्भविधानेनाध्वर्योः कर्तृत्वोपचारेण तत्कर्तृकस्य वर्तमानस्यावघातस्याह्वानं प्रति कालिकसम्बन्धेन विधित्वावसायादवघातकाले आह्वयतीत्यर्थप्रतीतेस्तस्य चार्थप्राप्तत्वादनुवाद एव । अत एव काललक्षणापि शतृप्रत्ययोपात्तलक्षणत्वघटकतया आपाद्यमाना नातीव दोषमावहति । कालीनत्वस्य सम्बन्धविधया भानोपपत्तेर्न सापि ।

वस्तुतस्तु पत्नीकर्तृकेऽवघातेऽन्वारम्भकर्तृत्वमात्रेणाध्वर्योः कर्तृत्वायोगादवहन्तिधातौ तदर्थसाधनीभूतान्वारम्भलक्षणापत्तेः नायं लक्षणे शतृप्रत्ययः । अपि तु प्रयोजकत्वापरपर्याये हेतौ । अतश्चाभिचरन्यजेतेतिवदवघातफलमाह्वानमित्यर्थोऽनूद्यते । अस्मिंश्च पक्षे शतृप्रत्ययस्य कर्तृत्वार्थकस्य न स्वतन्त्रकर्तृत्वमर्थः । फलीभूतावघातकर्तृभूतायाः पत्न्या आह्वानकर्तृत्वासंभवादवघ्नन्निति पुंस्त्वानुपपत्तेः । अपि तु प्रयोजककर्तृत्वमवघातं कारयन्नाह्वयतीति । सर्वथा अवघ्नन्नित्यस्यानुवादकत्वादाह्वानानुवादेन त्रिरभ्यासमात्रविधानान्न गौणावघाताङ्गत्वं मन्त्रस्येति सिद्धम् ।

सूत्रं नावघाताङ्गं मन्त्रः, अपि तु कालाद्यनुवादपूर्वस्त्रिरभ्यासविधिरेव कालादेरर्थप्राप्तत्वादिति व्याख्येयम् ॥

सू—गुणाभावात् ॥ ३—२—७ ॥

गुणोऽपि मुख्यार्थसादृश्यं नात्र झटिति प्रतीयमानं किञ्चिद्दृश्यते ।

अथ वा वाक्यादवघाताङ्गत्वासंभवेऽपि लिङ्गादेव तत्संभवं मन्वानं प्रत्युत्तरं सामर्थ्यरूपगुणाभावादिति ॥

सू—लिङ्गाच्च ॥ ३—२—८ ॥

"वाग्वा हविष्कृद्वाचमेव तदाह्वयती"त्यैकान्तिकस्त्रीलिङ्गायां पत्न्यामेव स्त्रीलिङ्गवाक्यसादृश्यमुपपद्यते । न त्ववघाते ॥

सू—विधिकोपश्चोपदेशे स्यात् ॥ ३-२-९ ॥

अध्वर्युकर्तृकावघाताङ्गतया मन्त्रोपदेशे पत्नीकर्तृकस्य "अत्र रक्षो दिवस्सपत्नं वध्यास"मिति मन्त्रसाध्यस्यावघातस्य त्वन्मते भिन्नत्वात्पक्षे तद्विधिकोपो वैकल्पिकत्वात् स्यात् ॥ प्रयोजनं स्पष्टम् ॥

इति तृतीयं हविष्कृदाह्वानाधिकरणम् ॥

अथ चतुर्थं वाग्विसर्गाधिकरणम् ॥ (४)

सू—तथोत्थानविसर्जने ॥ ३-२-१० ॥(सि)

(विषयसंशयौ)

ज्योतिष्टोमे—"उत्तिष्ठन्नन्वाहाग्नीदग्नीन् विहरे"ति । तथात्रैव "व्रतं कृणुतेति वाचं विसृजती"ति । दर्शपूर्णमासयोश्च "प्रणीताः प्रणेष्यन् वाचं यच्छति, तां सहविष्कृता विसृजती"तिश्रुतम् । तत्रापि पूर्ववदेव वाक्येन गौणयोरुत्थानवाग्विसर्गयोर्मन्त्रा विनियुज्यन्ते ? उत मुख्येष्वेवार्थेषु लिङ्गादिति संशयः ।

(सङ्गतिः)

पादाध्यायसङ्गतिश्च । आतिदेशिकी त्वनन्तरा ।

(पूर्वपक्षः)

तत्र सर्वत्र मुख्यक्रियान्तरसत्त्वात्तस्याश्च साधुत्वमात्रार्थत्वे प्रमाणाभावादवघ्नन्नित्यस्य लक्षणां विनापि हेतुत्वमात्रतयोपपत्तेः त्रिरभ्यासस्य च विधेयान्तरस्य सत्त्वेन प्रबलस्यापि ब्राह्मणवाक्यस्यान्यथोपपत्तिसंभवाद्युक्तो लैङ्गिको विनियोगः । प्रकृते तु विधेयान्तराभावेनोत्तिष्ठन्नित्यस्य लक्षणार्थत्वमङ्गीकृत्य कालस्यैव

तव मते विधेयत्वात् विधौ लक्षणापत्तेरुत्थानस्य च सामर्थ्यात् करिष्यमाणदेशान्तरविहितकार्यार्थत्वेन कृतार्थस्य मन्त्रपाठार्थत्वायोगेन शतृप्रत्ययस्य कारणत्वरूपहेतुत्वार्थत्वायोगादवश्यं फलत्वरूपहेतुत्वार्थमङ्गीकृत्य मन्त्रपाठस्यैव गौणसामर्थ्येनोत्थानाङ्गत्वं युक्तम् । व्रतवाक्ये तु शतृप्रत्ययस्याभावादितिकरणश्रुत्या वा विसर्गाङ्गत्वमेवावगम्यते ।

यद्यपि चेतिकरणस्थले वाक्यीयो विनियोगोऽभ्युपगम्येत तथापि ब्राह्मणवाक्यत्वेनास्य प्राबल्याद्युक्तं विनियोजकत्वम्, मन्त्रलिङ्गानुरोधमात्रेण विधौ काललक्षणायां प्रमाणाभावात् । न हीयं शतृप्रत्ययस्थल इवावश्यक्यपि, येन नात्यन्तदोषाय भवेत् । तस्मादत्रापि युक्तो गौणे विनियोगः । हविष्कृद्वाक्ये तु तृतीयैवेन्द्र्येतिवद्विनियोगकर्त्रीति न काचिदनुपपत्तिः ।

काललक्षणायां हविष्कृत्प्रातिपदिकेन मन्त्रपाठलक्षणा तु तवापि तुल्यैवेति मम मन्त्रमात्रलक्षणायामपि न कश्चिद्विरोधः । तस्मात्तत्रापि गौणे विनियोगः । गौणीवृत्तिप्रकारश्चाग्नीन्मन्त्रे तावदग्नीच्छब्देनोत्थानमेव यज्ञसाधनत्वाविशेषेण कथञ्चिदुक्त्वा तत्र च चैतन्यमध्यारोप्य त्वमग्निविहरणादि साधयेत्येवम् । लोटो वा प्राप्तकालतार्थत्वमङ्गीकृत्य विहरणस्य प्राप्तः काल इत्येवम् ।

न चाध्वर्युकर्तृकोत्थानस्याग्नीध्रकर्तृकाग्निविहरणसाधनत्वानुपपत्तिः । अत्र पूर्वपक्षवादिमतेऽस्य मन्त्रस्य प्रैषत्वाभावेनाग्निविहरणादेः "प्रैषेषु पराधिकारा" दिति न्यायविषयत्वाभावादाग्नीध्रकर्तृकत्वानुपपत्तेः समाख्याया आध्वर्यवत्वात् । सिद्धान्ते ह्यस्य प्रैषत्वेन पराधिकारत्वे प्राप्ते मन्त्रवर्णादाग्नीध्रविधिर्युक्तः ।

एवं व्रतमन्त्रेऽपि व्रतानियमं कृणुत नाशयतेति हिंसार्थकत्वं कृणोतेरङ्गीकृत्य व्याख्येयम् । वागधिष्ठानताल्वादिभेदाच्च

बहुवचनम् । चरतेति पाठेऽपि 'चर गतिभक्षणयो'रित्यनुशासनान्नाशनापरपर्यायभक्षणार्थत्वमङ्गीकृत्य स एवार्थः । हविष्कृन्मन्त्रेऽपि भक्षणेन हविर्नाशकत्वं दन्तादिनिष्ठं वाच्युपचर्य त्वमेहि प्रकटीभवेति व्याख्येयम् । अतोऽत्र गौणे विनियोग इति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—नात्रापि गौणे विनियोगः । प्रबलस्यापि ब्राह्मणवाक्यस्य कालविधायित्वेनाप्युपपत्तेः ।

न च लक्षणा; शतृप्रत्ययस्य लक्षणार्थत्वमङ्गीकृत्य श्रुत्यैवान्वयोपपत्तेः । अत एव कालस्यापि सम्बन्धविधया भानोपपत्तेर्न लक्षणा । अन्यथोत्थानाङ्गत्वमपि प्रकाशकत्वसम्बन्धेनेति तस्यापि लक्षणापत्तिः । एवमितिकरणस्यापि मन्त्रस्वरूपमात्रपरामर्शकत्वादव्ययत्वाच्च लुप्तविभक्तिकत्वेन करणत्वादेर्लक्षणयैव भानान्न श्रुतित्वं न्यायसुधोक्तं युक्तम् । ब्राह्मणवाक्यत्वेन प्राबल्येऽपि च सतिसप्तम्यर्थलक्षणया कालिकसम्बन्धेनोपलक्षणार्थत्वोपपत्तौ नावश्यं करणत्वलक्षणयानपेक्षिताङ्गाङ्गिमात्रपरत्वं युक्तमाश्रयितुम् । हविष्कृद्वाक्ये तु सत्यामप्यैन्द्रीवत् तृतीयया करणत्वोक्तौ वाग्यमापेक्षितावधिसमर्पकत्वेन तद्विधिपदैकवाक्यत्वोपपत्तौ वाक्यभेदे प्रमाणाभावात् तृतीयाया अपीत्थंभूतलक्षणार्थतामङ्गीकृत्य कालविधिरेव । क्लृप्तश्चोत्तरपदार्थविधिपाठक्रमेणोत्थानस्य कालः मन्त्रपाठक्रमेण च व्रतहविष्कृन्मन्त्रयोः । स च तत्र तत्र विधीयते । अतोऽत्रापि ब्राह्मणवाक्यानामन्यपरत्वाल्लिङ्गेन मुख्य एव विनियोगः । सूत्रप्रयोजने स्पष्टे ॥

इति चतुर्थमुत्थानवाग्विसर्गाधिकरणम् ॥

अथ पञ्चमं सूक्तवाकाधिकरणम् ॥ (५)

॥ सू—सूक्तवाके च कालविधिः परार्थत्वात् ॥ ३—२—११ ॥ (पू)

(विषयः)

दर्शपूर्णमासयोः सूक्तवाकस्समाम्नातः स किं लिङ्गादिष्टदेवताप्रकाशनार्थ एव ? अथ वा "सूक्तवाकेन प्रस्तरं प्रहरती" ति तृतीयाश्रुत्या प्रहरणाङ्गमपीति विचारः ।

(सङ्गतिः)

मुख्यसामर्थ्यस्य विनियोजकत्वं गौणसामर्थ्यस्य च श्रुतिसहायत्वमित्यभिहिते सतिसम्भवे मुख्यसामर्थ्यस्यापि तत्सहायत्वमित्युपपादनात् पादाध्यायसङ्गतिः । कालविध्यपवादाद्वानन्तरा ।

(पूर्वपक्षः)

तत्र प्रहरणस्य द्वितीयया प्रस्तरसंस्कारकत्वेनेव सूक्तवाकस्यापि लिङ्गेनेष्टदेवताप्रकाशनार्थत्वेन कृतार्थत्वात् "दर्शपूर्णमासाभ्यामिष्ट्वे" तिवत् वचनस्य कालविधित्वेनाप्युपपत्ते र्न प्रहरणाङ्गत्वं सूक्तवाकस्य ।

न च तत्र त्वाप्रत्ययेनेवेह कालस्य केनाप्यनुपात्तत्वात् "हविष्कृता वाचं विसृजती" तिवच्च वाक्यभेदादेर्लक्षणाकारणस्याप्यभावात न तृतीयया प्रहरणाङ्गत्वस्याकाङ्क्षोत्थापनेनाप्युपपत्तिरिति वाच्यम् । (१)"इत्थम्भूतलक्षणे तृतीये" त्यनुशासनेन करणत्वस्येव गमकत्वरूपस्य लक्षणत्वस्यापि तृतीयाशक्यत्वावधारणात् कालिकसम्बन्धेनेह सूक्तवाकस्य लक्षणत्वेन प्रहरणा-

---

१ पा. सू. २-३-२१

न्वयोपपत्तेः लक्षणां विनापि वाक्यस्य कालविधिफलकत्वेना-न्यपरत्वसम्भवात् कृतार्थयोरङ्गाङ्गिभावपरत्वानुपपत्तेः ।

न च ज्ञाननिरूपितजनकत्वरूपस्य लक्षणत्वस्य वाच्यत्वेऽपि ज्ञानस्येहानुपात्तत्वात् तदुपात्तभावनानिरूपितकरणत्वापेक्षया विलम्बोपस्थितिकत्वेन तस्य दौर्बल्यमिति पार्थसारथ्युक्तं युक्तम् । ज्ञाननिरूपितस्यापि शक्यतावच्छेदककोटिप्रविष्टत्वेनोपादानोपपत्तेः । अन्यथा करणत्वानुशासनेनैव करणत्वस्य श्रुतक्रियानिरूपितस्यापि शक्यतावच्छेदकत्वासम्भवे योग्यतयैवाध्याहृतज्ञानक्रियानिरूपितत्वोपपत्त्या लक्षणत्वसिद्धेः पृथगनुशासनवैयर्थ्यापत्तिः ।

न चैवमपि गमकत्वस्याकारकत्वेन धात्वर्थान्वयप्रतीतेः प्रधानभूतभावनानिरूपितकारकत्वापेक्षया दौर्बल्यमिति वाच्यम् । अकारकस्यापि निमित्तादेर्भावनान्वयाङ्गीकारेण गमकत्वस्यापि भावनाविषयत्वेन तुल्यत्वात् । अत एव विशेष्यभूतसुबन्तार्थप्रकारकशाब्दत्वावच्छिन्नं प्रति प्रत्ययजन्योपस्थितिर्भावनाविशेष्यतासम्बन्धेन कारणं लाघवात् । अत उपपदविभक्तितः कारकविभक्तेः प्राबल्ये प्रमाणाभावात् कृतार्थत्वबलेन तृतीयाया इत्थंभूतलक्षणार्थतामङ्गीकृत्य विनैव लक्षणां कालविधिफलकत्वमेव युक्तम् । अस्तु वा लक्षणा, तथापि सिद्धान्ते प्रहरतौ मान्त्रवर्णिकतत्तदग्न्यादिप्रत्येकदेवताविधिकल्पनापूर्वकैकहोमलक्षणाङ्गीकारात् तदपेक्षयानुशासनिकी तृतीयाया इत्थम्भूतलक्षणत्वलक्षणा अपेक्षितविधानापादिका युक्तैव ।

किञ्च तव मन्त्रेऽपि लक्षणा, 'अजुषते' ति भूतनिर्देशस्य वर्तमानप्रहरणविषयत्वानुपपत्तेः । अत इदं प्राकरणिकं पुरोडाशादि अग्न्यादिरजुषतेत्येवमिष्टप्रकाशनार्थ एव लिङ्गात् सूक्त-

वाके, न तु प्रहरणाङ्गम् । वचनस्य कालविशिष्टप्रहरणविधिपरत्वात् । क्लृप्तप्रश्नानूयाजोत्तरं सूक्तवाकपाठात्तत्काल इति न किञ्चिदनुपपन्नम् । सूत्रं स्पष्टम् ॥

(इति पूर्वपक्षः)

सू—उपदेशो वा याज्याशब्दो हि नाकस्मात् ॥ ३—२—१२ ॥ (सि)

(अथ सिद्धान्तः)

तृतीयाश्रुत्या कृतार्थस्यापि प्रहरणाङ्गत्वेनोपदेशः विना कारणं गमकत्वलक्षणाङ्गीकारे प्रमाणाभावात् ।

न च तत्राप्यनुशासनबलाच्छक्तिः; तस्य लाक्षणिकत्वेनाप्युपपत्तेः लाघवात् प्रचुरप्रयोगाच्च करणत्व एव शक्त्यङ्गीकारादुत्तरसूत्रवक्ष्यमाणन्यायेन प्रहृतौ जघन्ये होमलक्षणायाः फलमुखत्वेनादोषत्वाच्च ।

यत्तु मन्त्रेऽपि लक्षणेत्युक्तं, तत् 'अजुषत' स्यस्य पुरोडाशविषयत्वेऽपि अग्न्यादिः पुरोडाशादि सेवितवान् यत्तु यजमान 'आशास्ते' आयुरादि तदनेन प्रत्यक्षनिर्दिष्टेन प्रस्तराख्येन हविषेत्यग्रिमेण सहैकवाक्यत्वाल्लक्षणां विनापि प्रहरणप्रकाशकत्वोपपत्तेरकिञ्चित्करम् ।

यद्यपि चा "व्रिरिद" मित्याद्येव श्रूयेत तथापि न लक्षणा, इदंशब्देन प्रत्यक्षनिर्दिष्टप्रस्तरग्रहणात् ।

एवञ्च पुरोडाशादेर्हुतत्वेनेदंशब्दव्यपदेश्यत्वानुपपत्तेः अजुषतेति भूतनिर्देश "आशंसायां भूतवच्च" त्यनुशासनात् स्तुत्यर्थत्वेन नानुपपन्नः । अतः प्रहरणाङ्गमपि सूक्तवाकः ।

"सूक्तवाक एव याज्या(१)प्रस्तर आहुति" रिति सूक्तवाकस्य वस्तुतोऽयाज्यारूपस्यापि त्यागसाधनीभूतमन्त्रत्वसादृश्याद्याज्याशब्दव्यपदेशस्तुत्यर्थमुपपद्यते । कालविधौ तु तदभावादनुपपन्नः ।

कथं पुनरस्य न मुख्यमेव याज्यात्वम् ? तदुच्यते—याज्यात्वं हि याज्ञिकप्रसिद्धेरवयवयोगाच्च होतृप्रवचनविहितत्यज्यमानद्रव्यसम्बन्ध्युद्देशाङ्गभूतदेवताप्रकाशकमन्त्रत्वरूपमवगम्यते । न च तत्सूक्तवाके होमरूपप्रहरणसाधनीभूते संभवति, यागहोमयोर्भेदात्। अत्र च मन्त्रत्वग्रहणं याज्यादौ पठ्यमानदेवतापदस्योद्देशाख्यस्य याज्यात्वव्यावृत्त्यर्थम् । होतृवेदे विहितस्य "चतुर्होत्रा ग्रामकामं याजयेदि" त्यादौ यागसाधनीभूतस्य चतुर्होतृमन्त्रस्य याज्यात्वव्यावृत्त्यर्थं देवताप्रकाशकेत्युक्तम् । सूक्तभाक्त्वरूपदेवताप्रकाशनार्थत्वं स्तोत्रमन्त्राणामपीति तद्व्यावृत्त्यर्थं द्रव्येत्यादि । ऋग्वेदविहितदर्विहोममन्त्राणां सूक्तवाकस्य च व्यावृत्त्यर्थं त्यागविशेषणम् । आवाहनादिमन्त्राणां सूक्तवाकस्य चाग्नेयादियागाङ्गभूतदेवताप्रकाशकत्वात् याज्यात्वप्रसक्तौ वर्तमानवाचिशानच्प्रत्ययग्रहणम् । आध्वर्यवाणां "अग्ना३इ पत्नीवाः सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहे"ति पात्नीवतादियागमन्त्राणां व्यावृत्त्यर्थं होतृप्रवचनविहितेति विशेषणम् । मैत्रावरुणादियाज्यासु तत्सिद्ध्यै प्रवचनेत्युक्तम् ।

न चैवमपि मृगारेष्ट्यादिविकृतिष्वध्वर्युवेदे विहितास्वप्यौपदेशिकयाज्यानां यजुर्वेद एव विधानेन याज्यात्वानापत्तिप्रसङ्गाद्वषट्कारादितद्धर्मानापत्तिरिति वाच्यम् । तासां स्वरूपेण याज्यात्वाभावेऽपि याज्याकार्यविधानेन तद्धर्मप्राप्त्युपपत्तेः ।

यत्तु काचित्कं दर्शपूर्णमासादिमात्रे याज्यादिविधानं तदक्रु-

१ प्रस्तराहुतेः ।

त्स्नत्वाद्धौत्रस्य ऋग्वेदस्थशाखान्तरविहितयाज्याद्यनुवादकमेवेति न तेष्वप्राप्तिः । अस्तु वा तदनुरोधेन मन्त्रत्वादिवत्प्रसिद्धविषयत्वसमानाधिकरणो याज्यात्वमखण्डोपाधिरूपो धर्मविशेषः ।

न चैवं 'सूक्तवाकेऽपि सूक्तवाक एव याज्ये'ति प्रसिद्धेः सत्त्वाद्याज्यात्वापत्तिः, अस्या एवकारोपबद्धत्वेन विरुद्धत्वात् । न ह्ययं याज्यान्तरनिवृत्त्यर्थः । तस्यापि प्राप्तत्वात् । अतोऽयाज्यात्वेऽप्ययमेव याज्येति स्तुत्यर्थः । अत एव प्रस्तरे आहुतित्वस्य मुख्यत्वान्न तत्रैवकारः प्रयुक्तः । सूक्तवाकस्य च निगदत्वेन प्रसिद्धेः निगदानां च याज्यात्वाभावस्य "अयाज्या वै निगदा" इत्यनेन स्थलान्तरेऽनुवादादयाज्यात्वं स्पष्टम् । अत एव न तत्र तद्धर्माः ।

न च याज्यात्वाभावेऽपि सूक्तवाक एव याज्येति नामातिदेशेन तद्धर्मप्राप्तिः । अस्यार्थवादत्वेन प्रसिद्धसादृश्यमात्रेणोपपत्तौ तदन्तर्गतस्य याज्यानाम्न "उपशयो यूपो भवती"तिवदनतिदेशकत्वात् । कार्यापत्त्या तद्धर्मप्राप्तिस्तु प्रहरणे याज्यान्तरस्याविहितत्वादनाशङ्क्यैव । तत्सिद्धं मुख्ययाज्यात्वाभावेऽपि यागसाधनीभूतमन्त्रत्वसाम्याद्याज्यात्वव्यपदेशः प्रहरणाङ्गं तु सूक्तवाक इति ॥ सूत्रं स्पष्टम् ॥

सू–स देवतार्थस्तत्संयोगात् ॥ ३–२–१३ ॥

नन्वग्न्यादिप्रकाशकेन सूक्तवाकेन तद्रहितप्रहरणप्रकाशनासम्भवात् कथं तस्य तदङ्गत्वम् ? अत आह–स सूक्तवाको देवताकल्पनार्थोऽङ्गत्वेन रूपेण प्रहरणं प्रति संयोगात् आघारोपांशुयाजादिमन्त्रवत् । अत्र चाग्नेयादियागेष्वग्न्यादीनां प्रत्येकं देवतात्वेऽप्येतद्यागान्तर्गतोद्देशनिरूपितदेवतात्वस्य पुत्रनिष्ठपूतत्वादिवृत्तिफलत्वस्येव लाघवेन व्यासज्यवृत्त्येकस्यैव कल्पनम् । अतश्च

परप्रयुक्ताग्न्यादिवृत्तिना एकेन देवतात्वेनैकस्यैवैतत्प्रस्तरद्रव्यकस्य त्यागस्य कल्पनम् । शाब्दत्वार्थं चाजहत्स्वार्थलक्षणया आघारयतिवत् प्रहरतिना लक्षणाद्धोमत्वसिद्धिः । एकहोमकल्पनाच्च सत्यपि मन्त्रे प्रत्येकाधिष्ठानप्रकाशने यजमानेन समस्तान्यधिष्ठानान्युद्दिश्य युगपत् त्यागः कार्यः । याज्ञिकानां त्वेकद्रव्यकत्वेऽपि प्रत्येकत्यागकरणे मूलं न पश्यामः । सूत्रं स्पष्टम् ॥

सू—प्रतिपत्तिरिति चेत ॥ ३-२-१४ ॥

ननु-प्रहरतिना होमलक्षणायां तस्योद्देश्यत्यागप्रक्षेपरूपक्रियासमुदायरूपत्वात् तत्र च प्रक्षेपमात्रस्य प्रकृतिप्रतिपत्तित्वेऽपि त्यागस्य स्विष्टकृदादाविवाराढुपकारकत्वापत्तेः प्रस्तरमिति द्वितीयोक्तप्रस्तरकर्मत्वस्य प्रक्षेप एवान्वयात् पदार्थैकदेशेऽन्वयापत्तिः ।

न चोत्तरार्धादितुल्यत्वम् । तत्र पञ्चम्या प्रक्षेपांशं प्रत्यपि गुणत्वेनैवोत्तरार्धे विहिते पश्चात्प्रयोजनाकाङ्क्षायां कल्पितविधौ प्रक्षेपमात्रं प्रत्युत्तरार्धस्य संस्कार्यत्वोपपत्तेः । अतश्च द्वितीयया प्रस्तरस्य प्रहरणमात्रप्रतिपाद्यत्वावगतेः प्रहरतिना होमलक्षणायोगादनाकाङ्क्षितविनियोगस्य सूक्तवाकस्य गौण्या वृत्त्या प्रहरणमात्रे विनियोगानुपपत्तेः तस्मिन् सूक्तवाकस्य कालार्थ एव संयोग इति चेत्—

सू—स्विष्टकृद्वदुभयसंस्कारस्स्यात् ॥ ३-२-१५ ॥

अत्रापि स्विष्टकृत्तुल्यतैव । न च पदार्थैकदेशेऽन्वयापत्तिः । शाब्दस्य कर्मत्वस्य प्रथमतः पदार्थभूतायां भावनायामेवान्वयेन पश्चात् पार्ष्ठिकान्वयवेलायां प्रक्षेपमात्रान्वयोपपत्तेः ।

न च भावनाख्यस्य यत्नस्यापि जन्यक्रियाभेदेन शब्दान्त-

रविषया भिन्नत्वात् प्रक्षेपमात्रजनकीभूते यत्ने तदन्वयाङ्गीकारापत्तौ तद्दोषतादवस्थ्यमिति वाच्यम् । क्रियाभेदेऽपि जन्यतावच्छेदकस्य होमत्वस्य व्यासक्तस्यैकत्वेन जनकीभूतयत्नवैजात्ये प्रमाणाभावेन शब्दान्तरन्यायाविषयत्वात् । समूहालम्बनवदनेकक्रियाजनकीभूतैकयत्नाङ्गीकारेण तदन्वयोपपत्तेः । अतश्च स्विष्टकृद्देव प्रक्षेपांश उपयुक्तप्रस्तरप्रतिपत्त्यर्थः, त्यागांशश्चारादुपकारकः, उद्देशांशेन देवतासंस्कारार्थः । तत्र त्वयं विशेषः— स्विष्टकृति त्यागान्तर्गतस्योद्देश्यस्यानुपयुक्ताग्निस्विष्टकृद्विषयत्वेनारादुपकारकत्वमेव । मन्त्रगतस्य त्विष्टेज्यमानदेवतासंस्कारकत्वम् । प्रकृते तु त्यागान्तर्गतस्यापीति ।

प्रयोजनं स्पष्टम् । पूर्वपक्षे सूक्तवाकपाठकाले प्रहरणं सिद्धान्ते त्वन्त इत्याद्यूह्यं च ॥

इति पञ्चमं सूक्तवाकाधिकरणम् ॥

अथ षष्ठं सूक्तवाकस्य विभज्य विनियोगाधिकरणम् (६)

सू—कृत्स्नोपदेशादुभयत्र सर्ववचनम् ॥ ३-२-१६ ॥

(विषयसंशयसङ्गतयः)

तदेवं श्रुतिप्रमाणके प्रहरणाङ्गत्वे मुख्यसामर्थ्यस्य सहायत्वे निरूपितेऽधुना प्रसङ्गाच्छ्रुतिविनियुक्तस्य सूक्तवाकस्य मुख्यसामर्थ्यादिष्टदेवताप्रकाशनार्थत्वमप्यस्ति ? नवा ? इति चिन्तनात् पादाध्यायानन्तरसङ्गतयः ।

(पूर्वपक्षः)

तत्र प्रबलप्रमाणेन प्रमिते प्रहरणाङ्गत्वे तेनैव निराकाङ्क्षस्य

सूक्तवाकस्येष्टदेवताप्रकाशनविषये लिङ्गेन श्रुतिकल्पनानुपपत्तेर्न्यायविरोधेऽपीष्टदेवताप्रकाशनाङ्गम् ।

न चात्राविरोधोऽपि । सूक्तवाकपदस्याध्येतृप्रसिद्ध्या समस्तानुवाके रूढत्वात् । भवन्मते चेष्टदेवताप्रकाशकपदसमुदायस्यैव पाठेन सूक्तवाकावयवपाठापत्त्या सूक्तवाकपदेऽवयवलक्षणाप्रसङ्गेन प्रातिपदिकश्रुतेर्बाधापत्तेः ।

न च सुष्टूक्तं वक्ति असौ सूक्तवाक इति व्युत्पत्त्या सूक्तवाकशब्दस्य क्लृप्तावयवयोगेनोपपत्तेस्स्वतन्त्ररूढिकल्पनानवकाशः । तथात्वे पारायणाध्ययनजपादावपि कतिपयदेवतावाचिपदानामेवाभितस्तन्त्रपदोपेतानां पाठेन सूक्तवाकपदार्थसम्पत्त्यापत्तेः ।

अथ तत्राध्येतृप्रसिद्ध्या यावदाम्नातदेवतापदसमूहस्यैव तन्त्रपदोपेतस्य सूक्तवाकपदवाच्यत्वम्, ततो लब्धात्मिकायास्समूहरूढेरवयवयोगस्य दुर्बलत्वान्न तद्बलेनैकदेशप्रयोगसिद्धिः । अतश्च श्रुतिविरोधे लिङ्गस्य विनियोजकत्वायोगान्नेष्टदेवताप्रकाशनार्थत्वं सूक्तवाकस्य । अस्तु वा तत्, तथापि नेष्टदेवताप्रकाशनस्य सूक्तवाकप्रयोजकत्वम्, अपि तु प्रहरणस्यैव विनियोजकप्रमाणद्वयसत्वे प्रबलप्रमाणप्रमितस्यैव विशेषिणः प्रयोजकत्वकल्पनौचित्यात् । अतश्चायुरादिवदानुषङ्गिकमस्त्विष्टदेवताप्रकाशनम् । प्रहरणं पुनरिष्टानिष्टदेवतापदसाधारण्येन सूक्तवाकप्रयोजनं न विरुध्यते । अतश्च सम्पूर्णस्सूक्तवाकः पौर्णमास्याममावास्यायां च प्रयोक्तव्य इति फलितम् । सूत्रं स्पष्टम् ॥

(इति पूर्वपक्षः)

सू-यथार्थं वा शेषभूतसंस्कारात् ॥ ३-२-१७(सि)

(सिद्धान्तः)

सत्यं प्रबलप्रमाणप्रमिते दुर्बलप्रमाणस्यानवतारो यदि दुर्बलप्रमाणानुपजीवि प्रबलं भवेत्, यथा ऐन्द्र्यादौ; प्रकृते तूपजीवित्वाद्द्वयोरपि विनियोजकत्वम्।

तथा हि-श्रुतिर्हि लिङ्गं यदि बाधेत ततो मन्त्रवर्णकल्पितदेवताकहोमान्तर्गतस्य देवतोद्देशस्यानुपयुक्तसंस्कारकत्वानुपपत्तेरारादुपकारकत्वं प्रसज्येत। अतस्तस्य दृष्टविधया सामवायिकत्वलाभार्थं प्रहरणविधिरेव लिङ्गोन्नीतमिष्टदेवतासंस्कारार्थत्वं मन्त्रस्याप्यनुमन्यते। एतेनानुषङ्गिकदेवतासंस्कारार्थत्वपक्षोऽपि निरस्तः। तस्मिन्नपि पक्षेऽनुपयुक्तदेवतापदांशे आरादुपकारकत्वप्रसङ्गस्य तुल्यत्वात्।

अत एव सूक्तवाकस्येष्टदेवताप्रकाशनमेव प्रयोजकं, न तु होमः। ततश्च विभज्य विनियोगसिद्धिः। इष्टदेवताप्रकाशनस्यापि प्रयोजकत्वं मन्त्रलिङ्गाधीनत्वात् संनिपत्योपकारकत्वकल्पनामूलकत्वाच्च विभज्य विनियोगविषय एव, न तु होमाभावेऽपि सूक्तवाकपाठविषये। यदनेन हविषेति हि मन्त्रे प्रत्यक्षनिर्दिष्टस्य प्रस्तरहविष आयुरादिफलस्य च निर्देशेन तदंशेन होमस्यैव प्रयोजकत्वावगतेः एकदेशपाठस्य साकाङ्क्षत्वेनायुक्तत्वाच्च। अत एवावभृथादौ आज्यभागाङ्गेष्टदेवताप्रकाशनार्थतया न सूक्तवाकपाठः। अपूर्वत्वेन प्रस्तराभावेन च होमाभावात्। प्रस्तरनाशादौ त्वाज्येन होमस्य सत्त्वात् तत्पाठ इष्ट एव। अयं चाविकलो न्याय उत्तमप्रयाजस्विष्टकृन्मन्त्रादिष्वपि ज्ञेयः।

तत्रापि सत्यपि महाप्रकरणसहकृतेन स्पष्टलिङ्गेनावाहनम-

न्त्रवद्वक्ष्यमाणदेवतासंस्कारार्थत्वे क्रमसहितावान्तरप्रकरणसहकृतेन लिङ्गेन मान्त्रवर्णिकदेवताकल्पनद्वारोत्तमप्रयाजाङ्गत्वमपि तन्मन्त्रस्यावधार्यते ।

अस्तु वा वचनादेव स्विष्टकृन्मन्त्रस्य स्विष्टकृद्यागाङ्गत्वादस्याप्युत्तमप्रयाजाङ्गत्वम् । न हि स्विष्टकृति मान्त्रवर्णिकदेवताकल्पनद्वारा लिङ्गस्य विनियोजकत्वं संभवति । चतुर्थ्युपात्ताग्निस्विष्टकृद्देवतावरोधात् । तेनावश्यं स्विष्टकृति वाचनिक एव मन्त्रविनियोगो वाच्यः । तद्वच्चोत्तमप्रयाजेऽप्यस्तु । अतश्चोत्तमप्रयाजान्तर्गतदेवतोद्देशस्य संनिपत्योपकारकत्वलाभार्थं वचनेनापि वक्ष्यमाणदेवताप्रकाशकलिङ्गोपजीवनाद्विभज्यविनियोगादिसिद्धिः ।

न चैवमपि स्विष्टकृद्देवतोद्देशांशस्यानुपयुक्तदेवताकत्वेनारादुपकारकत्वस्य निश्चितत्वात्तन्मन्त्रस्य लैङ्गिकेष्टयक्ष्यमाणदेवतासंस्कारार्थत्वानुपपत्तिरिति वाच्यम् । स्विष्टकृच्छब्दस्य यौगिकत्वबलेन तत्सिद्धेः ।

तथा हि—यथैव सूक्तवाकशब्दस्य सुष्टूक्तं वक्तीति व्युत्पत्त्या यौगिकत्वाद्विभज्य विनियोग इत्युत्तरसूत्रे वक्ष्यते तथैव स्विष्टकृच्छब्दोऽपीष्टमग्न्यादिदेवतारूपं सुष्ठु करोतीति व्युत्पत्त्या यौगिकस्सन् प्रकृतयागाङ्गभूताग्निविशेषणमिति तावन्निर्विवादम् ।

योगोऽपि च नेष्टदेवतासम्बन्ध्युत्तरार्धादिप्रतिपादकत्वेन । प्रक्षेपस्यैव तत्त्वेनाग्नौ देवताभूते तदभावात् । अतश्च (योगोपपादकापेक्षायां मन्त्र "अयाळग्निरग्नेः प्रिया धामानी"त्यादिना "होतः पावके"त्यादिवाक्यशेषात् स्विष्टकृद्देवतारूपो)ग्निः होतृरूपेणाज्यभागादिसम्बन्धयग्न्यादेः प्रियाणि धामान्यधिष्ठानानीष्टवानित्येवमवगतस्य योगस्याश्रयणीयत्वावगतेः स्विष्टकृद्देवताभूता-

( ) एतत्कुण्डलान्तर्गतो भागः 'ख' पुस्तके नास्ति ।

न्यादिविशेषणीभूतेष्टयक्ष्यमाणदेवताप्राप्तिसुष्ठुभावकारित्वरूपधर्मवशेनापि विभज्य विनियोगादिप्रतीत्युपपत्तिः । तस्मात् सिद्धं सूक्तवाक उद्देशांशस्योपयुक्तदेवतासंस्कारत्वलाभार्थं लिङ्गादपि विनियोग इति । सूत्रं स्पष्टम् ॥

सू—वचनादिति चेत् ॥ ३—२—१८ ॥

यत्तु सूक्तवाकपदस्य कृत्स्नसूक्तवाके रूढत्वात् प्रातिपदिकश्रुतिबाधापत्तेः तदनुरोधेनोद्देशांशे आराडुपकारकत्वकल्पनस्यापि न्याय्यत्वात् न तल्लिङ्गस्य विनियोजकत्वमित्युक्तम् । तत्राह—

सू—प्रकरणाविभागादुभे प्रति कृत्स्नशब्दः ॥ ३—२—१९ ॥

अत्र भाष्यकारेणैवं सूत्रं व्याख्यातम्—अभ्युपगम्यैव सूक्तवाकपदस्य रूढिप्रयोगद्वयवर्तिप्रहरणद्वयोद्देशेन कृत्स्नस्य सूक्तवाकस्य विधानेऽप्येकैकप्रहरणेऽवयवशः प्रयोगो न विरुध्यते । यथा—"चातुर्विद्येभ्यश्शतं देयम्" "ऐकादशिनान् प्रायणीयोदयनीययोरालभेर"न्नित्यादौ समुदायोद्देशेन कृत्स्नविधिरेकैकवेदविदश्च शतचतुर्थांशः, प्रायणीये पञ्च पशवः उदयनीये षडित्यवयवशः प्रयोगः तथा प्रकृतेऽपीति ।

तत्त्वेवं दूषितम्—न समुदायस्य फलसाधनता, यज्यादिपदे लक्षणापत्तेः । अपि तु समुदायिनामेव । तत्र तु फलं प्रत्युपादेयत्वात्तद्विवक्षायामपि नेतिकर्तव्यतान्वये साहित्यविवक्षा उद्देश्यत्वात् । अतश्च प्रत्येकमेव षण्णां यागानामितिकर्तव्यतान्वयात् प्रयाजादीनामिव प्रत्येकमेव प्रहरणान्वयः । सूक्तवाकोऽपि च तदङ्गत्वात् प्रत्येकमेव कर्तव्यतया कृत्स्नः प्राप्नोतीति कालैक्यात्त्रयाणामर्थे प्रहरणतन्त्रतया

तन्त्रेण प्राप्तावपि तस्य नावयवशः प्रयोगसिद्धिः । शतदानविधौ तु सम्प्रदानस्यासंस्कार्यत्वेनोपादेयत्वात् साहित्यविवक्षा ।

एवं प्रायणीयवाक्येऽपि द्वादशाहाङ्गभूतैकादशिनोद्देशेन प्रायणीयोदयनीयरूपदेशस्य विधेयत्वात् तत्साहित्यविवक्षा । अतश्च तत्र युक्तोऽवयवशः प्रयोगः ।

एवं यत्रोत्पत्तिवेलायामेव व्यक्त्यैकत्वमवधारितम्, यथा-"चतुर्जुह्वां गृह्णाती" त्यादौ चतुर्गृहीतैकत्वस्य तत्रापि प्रयाजत्रयोद्देशेन विधानेऽप्यावृत्त्यनुपपत्तेरवयवशः प्रयोगः । प्रकृते तूत्पत्त्यवगतस्य सूक्तवाकस्वरूपस्यावृत्तावप्यबाधान्नावयवशः प्रयोग इति ।

स्वयं च प्रातिपदिकश्रुतिविरोध एवं परिहृतः—नायमेकस्सूक्तवाकः । देवतापदानां परस्परान्वयाभावेनैकार्थ्यप्रतिपादकत्वाभावादेकवाक्यत्वानुपपत्तेः । अपि त्वभितस्तन्त्रपदोपेता एकैकदेवतापदमध्या बहवस्सूक्तवाकाः । अतश्च विभक्तस्यैव सूक्तवाकस्वेन तृतीयया प्रहरणं प्रति करणत्वेन विधानात्प्रातिपदिकतृतीयाश्रुत्यविरोधः । एकवचनं परं पाशाधिकरणन्यायेन बहुत्वलक्षणार्थम् । एवं चेष्टदेवताप्रकाशनरूपलैङ्गिककार्यानुरोधेनैकप्रहरणप्रयोगे सूक्तवाकत्रयपाठोपपत्तिः । अभितस्तन्त्रपदानां तु लाघवात् सकृत्पाठ इति ।

तदपि पुनर्वार्तिककारेण दूषितम्—न बहवस्सूक्तवाकाः, वैश्वानरादिवाक्यवदुपक्रमोपसंहारैक्येनैकवाक्यत्वोपपत्तेः । न च तत्तद्देवतापदानां संभूयैकार्थप्रतिपादकत्वाभावात्तदसम्भवः । प्रत्येकपदानामेकार्थप्रतिपादकत्वाभावेऽपि यदनेन हविषेत्यनेनैकवाक्यतयैकप्रयोजनस्योपपत्तेः । उपपादितश्च तदेकवाक्यतया पूर्वाधिकरण एव सूक्तवाकार्थः ।

यद्यपि चेष्टदेवताप्रकाशनस्यैव सूक्तवाकप्रयोजकत्वादर्थ-

तः प्राधान्यं तथापि प्रहरणस्यापि शाब्दबोधेऽङ्गित्वेनार्थतोऽपि वा प्राधान्यसत्त्वादेकप्रयोजनत्वोपपत्तिः । यदि च तत्तद्देवताप्रकाशनानामेव शब्दतोऽपि प्राधान्यमङ्गीकृत्य नानावाक्यत्वमिष्येत ततो "या ते अग्ने" इत्यादिवदभितस्तन्त्रपदानामप्यनुषङ्गेण पृथक् पाठापत्तिः । सूक्तवाकेनेत्येकवचनबलाच्चानियमेनैकस्यैव सूक्तवाकस्य श्रुत्या विनियोगापत्तेः तदंश एव च सन्निपत्योपकारकत्वलाभार्थमिष्टदेवताप्रकाशनार्थत्वकल्पनोपपत्तेर्न सूक्तवाकत्रयपाठसिद्धिः । अतोऽन्यथा परिहृतम्—न सूक्तवाकपदस्य प्रत्येकं समुदाये वा शक्तिः, गौरवात् । अपि तु सुष्ठूक्तं वक्तीति व्युत्पत्त्यैकप्रयोगवृत्तियावदिष्टदेवताप्रकाशकमन्त्रविशेषे योगरूढः । अतश्चेष्टदेवताप्रकाशनकार्यानुरोधेनानिष्टदेवताप्रकाशकपदानुच्चारणेऽपि न सूक्तवाकप्रातिपदिकश्रुतिविरोधः ।

यस्मिन् प्रयोगे यावत्यः प्राकृत्यो वैकृत्यो वा देवता इष्टास्तावत्पदसमुदायस्यैवाभितस्तन्त्रपदोपेतस्यावयवप्रसिद्ध्या सूक्तवाकपदवाच्यत्वावधारणात्तावत एव शाब्दबोधकालीनप्रहरणप्राधान्यमादायैकवाक्यत्वोपपत्तेश्च ।

न चैवमध्ययनादिकाल इष्टत्वाभावेन फलोपहितेष्टदेवताप्रकाशकमन्त्रत्वाभावात् सूक्तवाकपदप्रयोगानुपपत्तेस्तदर्थं स्वरूपयोग्यतामात्रेण शक्त्यङ्गीकारे चानिष्टदेवताप्रकाशकपदानामपि योग्यतामात्रेण प्रयोगोपपत्तेरध्ययनादिकाले च द्वित्रिदेवतापदसहितमन्त्रपाठमात्रेणापि सूक्तवाकत्वसिद्ध्यापत्तौ वैदिकानां यावच्छ्रुतदेवतापदसहितमन्त्रपाठ एव तत्प्रसिद्धिविरोधापत्तेरवश्यं तत्र रूढेरेव कल्पनीयत्वात् तया च योगबाधेन क्रतुकालेऽपि समस्तस्यैव पाठावगतेः कथं न श्रुतिविरोध इति वाच्यम् । सूक्तवाकशब्दस्याध्ययनादिकालीनवैदिकप्रसिद्ध्यनुरोधेन दर्श-

पूर्णमासीययावद्देवतापदसमुदायसहितमन्त्रे निरूढलक्षणाङ्गीकारात् । अश्वकर्णादौ तु शक्यसम्बन्धप्रतीत्यभावात् क्लृप्तावयवशक्तिबाधेनाप्यतिरिक्तशक्तिकल्पनमिति वैषम्यम् । तस्मात् श्रुतिविरोधाभावादुपजीव्यत्वेन मुख्यसामर्थ्यस्यापि युक्तमेव विनियोजकत्वम् ।

प्रयोजनं विभज्य विनियोगादि स्पष्टम् । सूत्रं च प्रकरणस्य प्रकृष्टकरणस्यावयवशक्तिरूपस्याविभागात् प्रत्यभिज्ञानाद्रूढिकल्पनानुपपत्तेरुभे प्रत्यवयवप्रयोगेऽपि कृत्स्नस्सूक्तवाकशब्दार्थो नानुपपन्न इति व्याख्येयम् ॥

इति षष्ठं सूक्तवाकस्य विभज्यविनियोगाधिकरणम् ॥

अथ सप्तमं लिङ्गक्रमसमाख्याधिकरणम् ॥ (७)

सू—लिङ्गक्रमसमाख्यानात्काम्ययुक्तं समाम्नानम् ॥ ३-२-२० ॥

(विषयसंशयौ)

काम्येष्टिकाण्डे(१)"ऐन्द्राग्नमेकादशकपालं निर्वपेद्यस्य सजाता वीयु"रित्याद्याः काम्येष्टयस्समाम्नाताः । तेनैव क्रमेण मन्त्रकाण्डे तत्तल्लिङ्गा एव काम्ययाज्यानुवाक्याकाण्डमित्येवं समाख्याता "इन्द्राग्नी रोचना दिवः" इत्याद्या मन्त्रास्समाम्नाताः । ते किं लिङ्गमात्रादिन्द्राग्न्यादिदैवत्यकर्ममात्राङ्गं ? किं वा क्रमसमाख्यानुरोधेन काम्येष्टिष्वेवेति सन्देहः ।

१. मै. सं. २-१-१.

(सङ्गतिः)

लिङ्गविनियोगोपयोग्युद्देश्यतदवच्छेदकविचाराल्लिङ्गोपजीविप्रमाणान्तरविचाराच्च पादाध्यायसङ्गती । पूर्वं श्रुतेर्जघन्यप्रमाणापेक्षत्वे निरूपिते लिङ्गस्यापीह तन्निरूपणात्प्रासङ्गिकी त्वनन्तरा ।

(पूर्वपक्षः)

तत्र स्वाध्यायविध्यध्यापितस्य मन्त्रजातस्य प्रयोजनाकाङ्क्षत्वादाकाङ्क्षासहकृतेन योग्यतारूपेण लिङ्गेन मन्त्रस्येन्द्राग्निप्रकाशनार्थत्वकल्पनोपपत्तेर्न लिङ्गस्य सामान्यसम्बन्धप्रमाणापेक्षा ।

न च लिङ्गं सामान्यतः क्रतुसम्बन्धेऽवगते एव द्वारविशेषविनियोजकमित्यत्रापि किञ्चिन्नियामकमस्ति । श्रुतिवदेव पूर्वं क्रतुसम्बन्धानवगमेऽप्याकाङ्क्षासहकृतलिङ्गेन वहनयोग्यस्य पुरुषस्याकाङ्क्षायां सत्यां वहने विनियोगवदिन्द्राग्नी प्रकाशनेऽपि विनियोगोपपत्तेः । न चेन्द्राग्निप्रकाशनस्वरूपे वैयर्थ्यादस्त्येवापूर्वसाधनत्वकल्पनातात्पर्यग्रहार्थं प्रमाणान्तरापेक्षेति वाच्यम् । श्रुत्यादेरपि तदपेक्षत्वेन लिङ्गस्यैव विशिष्य तदपेक्षत्वोद्घोषे प्रमाणाभावात् । अस्ति चात्रापूर्वसाधनत्वकल्पनातात्पर्यग्राहकं प्रमाणम् । इन्द्राग्न्यादिदेवतानां क्रत्वव्यभिचारित्वेन जुहूवत्क्रतूपस्थापकत्वोपपत्तेः । देवतात्वं हि यागैकनिरूपितं विहितत्वघटितं चेति न लौकिकम् । न च तस्यालौकिकत्वेऽपि तत्त्वेन रूपेण मन्त्रेणाप्रकाशनादधिष्ठानमात्रस्य चेन्द्राग्न्यादेर्मन्त्रार्थवादादौ यागं विनापि स्वर्गमेर्वादिस्थत्वेन प्रतिपादनाल्लौकिकत्वावगतेः कथमव्यभिचरितक्रतुसम्बन्ध इति वाच्यम् । मन्त्रार्थवादादेरन्यपरत्वेन स्वर्गादिस्थत्वे प्रमाणाभावात् । स्वार्थपरेण च तद्धितादिना क्रत्वव्यभिचारित्वेनैव तदुपस्थितेश्च ।

किञ्च क्रत्वव्यभिचाराभावेऽप्यस्ति तावत्तेषां क्रतुसम्ब-

न्धः। अतश्च स्मारकविधयैव क्रतूपस्थित्युपपत्तेरानर्थक्यभिया च लौकिकनिराकरणोपपत्तेः परिशेषादेवापूर्वसाधनत्वलक्षणोपपत्तेर्न तदर्थं प्रमाणान्तरापेक्षा। अतो निरपेक्षेण लिङ्गेन क्रमसमाख्ययोर्बाधात् सर्वार्थत्वमित्येवं प्राप्ते—

(सिद्धान्तः)

अभिधीयते—नाकाङ्क्षाभावे योग्यतामात्ररूपस्य लिङ्गस्य विनियोजकशब्दकल्पकत्वं युक्तम्। वहनयोग्यस्यापि पुंसो नैरपेक्ष्ये सति वहने विनियोगादर्शनात्।

न च मन्त्रगतायाः प्रयोजनाकाङ्क्षायास्सत्त्वान्न क्षतिरिति वाच्यम्। वाचस्तोमादावर्थद्वारत्तिगुणप्रकाशनद्वारैव विनियोगसत्त्वेन मन्त्राणां स्वतो निराकाङ्क्षत्वात्। अतश्च प्रकरणक्रमादिना पुनराकाङ्क्षामुत्थाप्य सामान्यतः क्रत्वन्तरसम्बन्धेऽवगते द्वारविशेषजिज्ञासायां लिङ्गान्मुख्यगौणाद्यर्थसम्बन्धोपपत्तिः।

इदमेव च लिङ्गस्य सामान्यसम्बन्धबोधकप्रमाणसापेक्षत्वं न श्रुत्यादेरित्यत्र बीजम्, आकांक्षां विनापि तत्राङ्गताबोधात्।

न च वाक्येनैव ब्राह्मणगतेन सर्वेषां मन्त्राणां वाचस्तोमाङ्गत्वेन निराकाङ्क्षत्वावगतेर्न प्रकरणादिना दुर्बलेनाकाङ्क्षोत्थापनसम्भवः। तत्तन्मन्त्रविशेषविषयाणां तत्तत्प्रकरणादीनामबाधेनोपपत्तौ सर्वसाधारण्येन तत्तन्मन्त्रपाठकालोत्पन्नप्रयोजनाकाङ्क्षावेलायामनुपस्थितेन वाचस्तोमवाक्येन बाधायोगात्, अन्यत्र वचनविनियुक्तमन्त्रविषये नैराकांक्ष्योत्पादनायोगेन तत्साहचर्यात्प्रकरणादिविनियुक्तविषयेऽपि तदयोगाच्च। अतश्च वाचस्तोमवाक्येन सर्वेषां मन्त्राणां विनियोगेऽपि प्रमाणान्तरेण तत्र तत्राकांक्षोत्थापनाद्युक्तस्तत्र लिङ्गेन विनियोगः। तच्च प्रमाणान्तरं क्वचिद्वाक्यं—यथा वषट्कारादिमन्त्राणां "एष वै सप्तदशः

प्रजापतिर्यज्ञेऽन्वायत्त" इति । "बर्हिर्देवसदनं दामी"त्यादीनां प्रकरणम् । प्रकृते त्व क्रमस्समाख्या च । पूषानुमन्त्रणमन्त्रादावपि समाख्येत्युक्तमेव । नच प्रबलप्रमाणेन विनियुक्तस्यापि दुर्बलेनान्यत्राकाङ्क्षोत्थापनेन विनियोगे समाख्यासहकृतमुख्यलिङ्गेनान्यत्र विनियुक्तस्यापि पूषानुमन्त्रणमन्त्रस्य प्रकरणसहकृतगौणलिङ्गेन दर्शपूर्णमासयोरावाहनादिमन्त्रवन्मन्त्रान्तरसमुच्चयेनापि विनियोगोपपत्तिः । तन्मात्रविषयप्रमाणद्वयस्थले मन्त्रपाठकालोत्पन्नप्रयोजनाकाङ्क्षावेलायामुपस्थितेन प्रबलप्रमाणेन दुर्बलस्य बाधोपपत्तेः ।

अत एव गार्हपत्याङ्गताबोधकश्रुत्यैवेन्द्राङ्गत्वस्य बाधो, न तु वाचस्तोमवाक्येन । अतस्सिद्धं सामान्यसम्बन्धबोधकप्रमाणेनैवाकाङ्क्षोत्थापने सति लिङ्गस्य विनियोजकत्वमिति । अतश्च क्रमसमाख्यानुरोधेन काम्येष्टिविषयत्वमेव ।

न चान्यत्राप्यव्यभिचरितक्रतुसम्बन्धरूपव्याप्तिबलेनाकाङ्क्षोत्थापनसम्भवः । प्रकरणपाठादौ ह्येतत्प्रकरणपठितेन मया कथमस्योपकर्तव्यमिति जायतेऽपेक्षा, न त्वव्यभिचरितक्रतुसम्बन्धेऽपि । व्याप्तेर्बोधकत्वनैयत्येऽप्याकाङ्क्षोत्थापकत्वासंभवात् । न हि वह्निविषये निराकाङ्क्षस्य वह्न्यनुमितौ जातायां तद्विषये पुनराकाङ्क्षोपजायते । अत एव जुह्वादिप्रतिपादकस्याप्यनारभ्याधीतस्य मन्त्रस्य सामान्यसम्बन्धबोधकप्रमाणान्तराभावसत्त्वे नैव दर्शाद्यङ्गत्वम्, किन्तु वाचस्तोमाद्यङ्गतैवेति ध्येयम् ।

अतश्च यद्यपीन्द्राग्न्यादीनामपूर्वाव्यभिचारस्स्यात् तथापि न तन्मन्त्राणां सर्वार्थत्वम् । किमुत यदा नैव सः ।

ननु—कोऽयमव्यभिचरितसम्बन्धो नाम ? या या जुहूस्सा सा क्रतुसाधनमित्येवं व्याप्तिरूप इति चेत्—हन्त हिरण्यादेरप्यपूर्वसाधनत्वयोग्यत्वात्तदव्यभिचारापत्तिः । सर्वव्यक्तीनां फलो-

प्रधाननैयत्याभावाद्व्यभिचार इति चेत्–जुह्वादावपि तुल्यमेतत् ।

किञ्चैवमिन्द्रादेः कथं व्यभिचारित्वम्? तस्य स्वर्गमेर्वादिस्थत्वेऽपि क्रतुसम्बन्धाव्यभिचारात्। न ह्येतादृशी काचिदिन्द्रव्यक्तिरस्ति, या नापूर्वीयसूक्तहविर्भाक्, प्रमाणाभावादिति चेत्–नः अपूर्वमात्रनिरूपितसाधनतावच्छेदकीभूतो यो धर्मस्तदवच्छिन्नस्यापूर्वाव्यभिचार इति नियमाङ्गीकारात् । भवति चाकारविशेषत्वरूपजुहूत्वादि तथा कार्यान्तरं प्रति काष्ठत्वादिना साधनत्वेनाकारविशेषत्वादिना तत्त्वे प्रमाणाभावात् । हिरण्यादेस्तु तत्त्वेनैव कार्यान्तरसाधनतेति वैषम्यम् ।

इन्द्रादिस्थलेऽपि पदस्यैवास्मन्मते देवतात्वादानुपूर्वीयविशेषविशिष्टवर्णत्वस्यापूर्वीयसाधनतावच्छेदकत्वेऽपि कार्यान्तरं प्रत्यपि साधनत्वाद्व्यभिचारः ।

अस्त्येव हि तादृशानुपूर्वीविशेषविशिष्टवर्णत्वेन स्वार्थबोधं प्रत्यपि करणता । अन्यथा तदवच्छिन्नस्य प्रातिपदिकसंज्ञानुपपत्तेः। स्वार्थस्य चापूर्वसाधनत्वकल्पने प्रमाणाभावान्न तद्द्वारापि पदस्यापूर्वाव्यभिचारः। अग्न्यादिपदस्य तु व्यभिचारस्स्पष्ट एव । अतोऽव्यभिचरितक्रतुसम्बन्धस्यैवाभावात् सत्वेऽपि वा तेनाकाङ्क्षानुत्थापनान्न सर्वार्थत्वम् । स्मारकविधया बोधनाकाङ्क्षोत्थापनं तु दूरभ्रष्टमेव। अत एव यत्राध्ययनविधिसिद्धार्थज्ञानस्योपनिषज्जन्यजीवात्मज्ञानस्य वा स्वत एव साकाङ्क्षस्य नाकाङ्क्षोत्थापकप्रमाणापेक्षा तत्र भवत्येव सामर्थ्यमात्रात्प्रमाणान्तराभावेऽपि क्रत्वङ्गता ।

वस्तुतस्तु कृष्यादिवन्नित्यप्राप्तस्य विधिकल्पने प्रमाणाभावेन विधेयत्वाभावान्न तत्राङ्गताबोधः, अपि तु जन्यत्वमात्रबोधः। अङ्गत्वं परं "यदेव विद्यया करोति" इत्यनेन कथञ्चिदवधेयम्

प्रकृते तु सामान्यसम्बन्धबोधकप्रमाणं विना लिङ्गमात्रेण विनियोगायोगात् क्रमसमाख्यानुरोधेन मन्त्राणां काम्येष्टिविषयत्वमेव ।

न च प्रबलेन क्रमेणैव सामान्यसम्बन्धबोधोपपत्तेः कथं दुर्बलसमाख्यायास्तद्बोधकत्वमिति वाच्यम् । यत्र पाथिकृतीयादिकेवलाग्निदेवत्येष्टावातिदेशिकमन्त्रप्राप्त्या न प्रधाने याज्याद्यपेक्षा, वाचनिकसाप्तदश्याम्नानाच्च सामिधेनीष्वाग्नेयऋग्द्वयापेक्षा, तत्र तदिष्टिक्रमाम्नाताग्नेयमन्त्रद्वयस्यापेक्षाक्रमेण प्रथमातिक्रमे कारणाभावेन च सामिधेनीषु निवेशप्रसक्तौ समाख्यया तन्निवर्तनात् । न हि तया क्रमस्य बाधः, सङ्कोचो वा । तस्य याज्यादिकार्ये निवेशेऽप्यविरोधात् । अपि त्वपेक्षिताविधानादिरूपस्य न्यायस्यैव । स तु समाख्यातो दुर्बल एवेति न किञ्चिद्बाधकम् ।

न च तर्हि काम्ययाज्यानुवाक्याकाण्डमित्येवं समाख्ययैवेष्टासिद्ध्युपपत्ते र्न क्वचित् क्रमस्यासाधारण्येन सामान्यसम्बन्धबोधकत्वमिति वाच्यम् । यत्राग्निवारुणीष्टिक्रमे तत्तद्देवत्यया-ज्यानुवाक्ये पठित्वा सोमारौद्रीष्टिक्रमाम्नाततद्देवत्ययाज्यानुवाक्यापाठात्पूर्वमाग्नेय्यो मनो ऋचः पृथुपाजवत्यश्च समाम्नाताः तत्र तासां लिङ्गविनियुक्तमन्त्रान्तरेण बाधादुत्तरेष्टियाज्यादिकार्ये समाख्यामात्रेण विनियोगानुपपत्तेः लिङ्गसहकृतसमाख्ययान्यत्र विनियोगप्रसक्तौ क्रमेण तां बाधित्वोत्तरेष्टिसामिधेनीकार्ये निवेशाङ्गीकारात् ।

न च क्रमः पूर्वस्यामपीष्टौ साधारणः । पूर्वेष्टिसामिधेनीस्थानस्य तदीययाज्यादिपाठेन व्यवधानात् । अत उत्तरेष्टिसामिधेनीकार्य एव क्रमान्निवेशः । एवं च तासां धाय्यासमाख्याप्युपपन्ना भवति ।

अपि च यत्रैन्द्राग्नयागद्वयक्रमे याज्यानुवाक्यायुगलद्वयमाम्नातम् तत्र क्रमानङ्गीकारे पूर्वस्योत्तरं युगलमुत्तरस्य पूर्वमित्येवमपि प्रसज्येतेति तद्व्यावृत्त्यर्थं क्रमग्रहणम् । प्रयोजनं सूत्रं च स्पष्टम् ॥

इति सप्तमं लिङ्गक्रमसमाख्याधिकरणम् ॥

अथाष्टममाग्नेय्यधिकरणम् ॥ (८)

सू-अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात् ॥३-२-२१॥

(विषयसंशयौ)

ज्योतिष्टोमे-आग्नेय्याऽऽग्नीध्रमुपतिष्ठते, ऐन्द्र्या सदो, वैष्णव्या हविर्धानमित्यादि श्रूयते । तत्र किं प्रकरणे पठितमपठितं वाग्न्यादिप्रकाशकं ऋङ्मात्रं तृतीयया तत्तदुपस्थानाङ्गत्वेन विनियुज्यते ? उत यत् प्रकरणे पठितं कार्यान्तरे च विशिष्य विनियुक्तं यथा-'अग्न आयाहि वीतय' इत्यादि स्तोत्रादौ तदेवात्र विनियुज्यत इति चिन्त्यते ।

(सङ्गतिः)

श्रुतिप्रमाणकेऽप्यत्र विनियोगेऽङ्गतावच्छेदकस्याग्न्यादिप्रकाशकऋक्त्वस्य लिङ्गप्रमेयत्वात्तदुपयोगिचिन्तनस्य पादसङ्गत्यविरोधः । अध्यायसङ्गतिस्तु स्पष्टैव । शुद्धस्य लिङ्गस्यापि विनियोजकत्वात् सामान्यसम्बन्धबोधकप्रमाणापेक्षत्वेऽपि श्रुतेस्तदभावे विनियोजकत्वोपपत्तेर्न तदपेक्षेत्येवं पूर्वपक्षोत्थानादनन्तरा ।

(पूर्वपक्षः)

तत्र सर्वमेव प्रबलं प्रमाणं न दुर्बलेनाविरोधिनापि सङ्कोचयितुमलम्, सङ्कोचस्यापि बाधापरपर्यायत्वात् । अन्यथा प्रयाजा-

देरप्यानन्तर्यात् पौरोडाशिकसमाख्यया चाग्नेयमात्राङ्गत्वापत्तिः । अतश्चात्र तृतीयया श्रुत्याग्निदेवत्यऋङ्मात्रस्यैव प्रकृताप्रकृतसाधारण्येनाग्नेयीप्रातिपदिकश्रुत्याभिहितस्याग्नीध्रोपस्थानाङ्गत्वेन विशिष्टविध्युत्तरकल्प्यविशेषणविधिना विनियोगान्न प्रकरणादिना सङ्कोचोपपत्तिः । न ह्यत्र "व्रीहीन् प्रोक्षती" त्यादाविव यथाश्रुतार्थे आनर्थक्यम्, येन तत्परिहारार्थमपूर्वसाधनत्वलक्षणातात्पर्यग्रहाय दुर्बलस्याप्यधिकाराख्यप्रकरणस्योपजीवनात्तेन स्वविषये सङ्कोच्येत । उपादेयत्वात्तु न तदाशङ्काप्याग्नेयीपदेऽस्ति । अत एव यत्राग्नीध्रोपस्थानस्वरूपे तदाशङ्का, तत्रास्त्येवापूर्वसाधनत्वलक्षणार्थं तदनुप्रवेशः ।

न चैतावता प्रकृताग्नेयीमात्रग्रहणापत्तिः । अप्रकृताभिरपि प्रकृतापूर्वसाधनीभूताग्नीध्रोपस्थानसम्भवात् । न चाग्नेयीशब्दस्य यौगिकत्वात् सन्निहितव्यक्तिवाचित्वप्रतीतेः प्रकृतमात्रग्रहणोपपत्तिः । यौगिकानामप्यवयवार्थविशिष्टव्यक्तिमात्रवाचित्वेन सन्निहितवाचित्वे प्रमाणाभावात् । पाचकादौ क्वाचित्की संनिहितव्यक्तिप्रतीतिस्तु प्रमाणान्तरादेव ।

न चैवमप्याग्नेयीशब्दस्य तद्धितान्तत्वात् तस्य च सर्वनामार्थवृत्तित्वेन सन्निहितव्यक्तिवाचित्वस्य स्थापितत्वात् कथमप्रकृतग्रहणापेक्षेति वाच्यम् । 'अग्न आयाहि वीतय' इत्यादीनामेकप्रकरणपठितत्वेऽपि प्रदेशान्तरस्थत्वेनासन्निहितत्वात् । पाठसन्निहितपरत्वमात्रं हि सर्वनाम्नां व्युत्पत्तिसिद्धम्, न प्रकरणसन्निहितत्वमपि । असम्बन्धिपदाव्यवधाने तादृशाविषये क्वापि प्रयोगादर्शनात् । अतस्सन्निहितवाचित्वासम्भवात् सर्वग्रहणोपपत्तिः ।

यत्तु न्यायसुधाकृता अन्यैश्चाग्निदैवत्यत्वऋक्त्वसन्निहितत्वादीनां मन्त्रविशेषोपलक्षणत्वादेकेन चोपलक्षणेन प्र-

कृतऋक्कार्यसिद्धौ उपलक्षणान्तरानपेक्षणादाग्निदेवत्यत्वऋक्त्वयो-श्श्रुतत्वाविशेषेणोभयोरप्युपलक्षणत्वेऽपि सन्निहितत्वस्य विग्रह-वाक्यस्थसर्वनामगम्यत्वेन विलम्बितप्रतीतिकत्वादविवक्षावगते-स्सर्वग्रहणमित्येवं समाहितम् । तन्न; विशेषणत्वेनैवान्वयसम्भ-वे उपलक्षणत्वे प्रमाणाभावात् । अस्तु वोपलक्षणत्वं, तथाप्यु-पादेयस्थले विशेषणत्ववत् सर्वेषामेवोपलक्षणत्वे किं बाधकम् ? किञ्च ऋक्त्वमपि नैव श्रुतं, स्त्रीत्वमात्रस्यैव स्त्रीप्रत्ययेनोक्तत्वात् । अतोऽग्निदेवत्यत्वापेक्षया तस्यापि विलम्बोपस्थितिकत्वादविव-क्षापत्तिः ।

किञ्च सन्निहितोपलक्षितव्यक्तिविशेषत्वमपि न विलम्बितम्, तस्य तद्धितवाच्यत्वेन गुणाधिकरणे व्यवस्थापनात् ।

यदपि भवदेवेन विशेष्यभूते सर्वनामार्थे यत्र विशेषणी-भूतदेवताया विधानं तत्रैव सर्वनाम्नस्सन्निहितावलम्बित्वम्, य-था—आग्नेयोऽष्टाकपाल इत्यादौ । न तु यत्र सर्वनामार्थ एव वि-धीयते विशेषणं तु नैव श्रुतं प्राप्तं वा न तत्र संनिहितावल-म्बित्वमिति । तदपि यदि पूर्वमताभिप्रायकं तदा तद्दूषणेनैव नि-रासः । यदि तु न, तत ईदृशनियमे प्रमाणाभावः 'तेनाक्षमुपा-ञ्ज्या'दित्यादौ व्यभिचारश्चेत्युपेक्षितम् । तस्मादुक्तप्रकारेणैव सर्वग्रहणम् ।

अस्तु वा कथञ्चिदाग्नेयीपदेन प्रकृतग्रहणं, तथापि ब्रह्मोदनप्राशनादौ यत्र 'चतुरो ब्राह्मणान् भोजये'दित्येव श्रुतम् तत्र सर्वनामश्रवणाभावादाधानाङ्गभूतऋत्विङ्मात्रग्रहणे नैव किञ्चिद्बीजम् । नहीदं ब्राह्मणसंस्कारार्थं भोजनम्, अपि तु ब्राह्मौदनिकाग्निसंस्कारकौदनप्रतिपत्त्यर्थम् । तन्नाशे पुनर्भोज-नानुष्ठानादर्शनात् ।

एवं सत्यपि यदि प्रकृतमात्रग्रहणे किञ्चित्प्रमाणं भवेत् ततो "यजमानपञ्चमा" इतिवत्कर्तृनियमांशे स्यादपि संस्कार्यत्वम्, न तु तदस्तीति सर्वग्रहणमेव।

न चैवं प्रकृतमात्रे नियामकान्तराभावेऽप्यप्रकृतग्रहणे तस्या आग्नीध्रोपस्थानस्वरूपार्थत्वे आनर्थक्यापत्तेरपूर्वार्थत्वकल्पनस्याप्यावश्यकत्वात् क्लृप्तापूर्वार्थतायाः प्रकृताया एवाग्नीध्रोपस्थानरूपद्वारान्तरसम्बन्धमात्रकरणेन लाघवात्तदुपजीविविधिश्रुत्या च प्रातिपदिकश्रुतेरपि सङ्कोचोपपत्तेः प्रकृतमात्रग्रहणोपपत्तिरिति वाच्यम्। प्रकृताया अपि ग्रहणेऽस्मिन्वाक्य उपस्थानपदेऽपूर्वसाधनत्वलक्षणाया आवश्यकत्वात्। न हि तत् स्वरूपेण द्वारम्, तत्कार्यापन्ने ऊहाद्यनापत्तेः। तावतैव चाप्रकृताया अप्यपूर्वार्थत्वोपपत्ते र्नानर्थक्यम्।

अपि च प्रकृताया अपि न साक्षादपूर्वार्थत्वम्। क्लृप्ततद्बोधकप्रमाणाभावात्। न हि प्रकरणं स्वातन्त्र्येण वाक्यान्तरकल्पनद्वारा वा तत्र प्रमाणम्, गौरवात्। तथात्वे च प्रोक्षणादेरपि तेनैवापूर्वार्थत्वोपपत्ते र्व्रीह्यादीनां यथाश्रुतानामेव द्वारत्वेन ग्रहणाद्यवादीनां द्वारत्वानुपपत्तेः। अपि त्वपूर्वसाधनीभूतस्तोत्रार्थत्वमेव। न च तावतोपस्थानविधौ कश्चिदुपयोगः अपूर्वसाधनीभूतोपस्थानार्थत्वालाभात्।

अस्तु वा प्रकृतायास्स्तोत्रादिवाक्येषु स्वातन्त्र्येणापूर्वार्थत्वक्लृप्तिः, तथापि तस्या दीक्षणीयावाङ्नियमन्यायेन स्तोत्रजन्यापूर्वार्थत्वस्यैव क्लृप्तेर्ज्योतिष्टोमापूर्वार्थत्वस्योपस्थानजन्यापूर्वार्थत्वस्य वा क्लृप्तत्वाभावेन तत्कल्पनस्यावश्यकत्वान्नात्र प्रकृताभिर्विशेषः। यत्किञ्चिदपूर्वार्थत्वक्लृप्तिमात्रेण प्रकृतग्रहणे त्वप्रकृतानामपि तत्र तत्र क्रत्वन्तरे विनियुक्तत्वादविशेषः। तस्मात्

सर्वग्रहणम् । यदि परं प्रकृतानां विशिष्य स्तोत्रादौ विनियोगेन निराकाङ्क्षत्वादन्यतराकाङ्क्षायुक्तसामान्यवाक्येन कथं विनियोग इत्याशङ्क्येत ततोऽस्त्वप्रकृतानामेव प्रयोजनसाकाङ्क्षाणां विनियोगः । सर्वथा न प्रकृतमात्रग्रहणम् ।

सूत्रं तु, अयं मन्त्रविधिरधिकारेऽधिकृतमन्त्रविषयेऽतदाख्येषु तद्भिन्नेषु चावगन्तव्यः । यदि परं विशिष्य शिष्टत्वादधिकृतानां निराकाङ्क्षत्वमाशङ्क्येत ततोऽस्तु तद्भिन्ने एवेति व्याख्येयम् ॥

(इति पूर्वपक्षः)

सू–तदाख्यो वा प्रकरणोपपत्तिभ्याम् ॥ ३–२–२२ ॥

(अथ सिद्धान्तः)

नैवञ्जातीयकस्थले सर्वग्रहणम् । प्रातिपदिकश्रुते विंनियोजकतृतीयादिश्रुतेश्चाविशेषप्रवृत्तावपि सर्वोपजीव्यप्रधानभूतविधिश्रुतेर्लाघवोपजीवनेन प्रकृतमात्रविषयत्वात् । तथा हि–यद्यपि तावदत्र मन्त्रविशिष्टोपस्थानमेवापूर्वसाधनीभूताग्नीध्रमण्डपसंस्कारार्थत्वेन विधीयते तथापि आर्थिकेन विशेषणविधिनोपस्थानोद्देशेन मन्त्रविधानोपपत्तिः । तत्रापि चोपस्थानस्वरूपे आनर्थक्यादपूर्वसाधनलक्षणा समस्त्येव, तथापि सर्वत्रापूर्वसाधनीभूतोद्देशेनाङ्गविधावर्थादपूर्वोद्देशेनापि तद्विधानस्यावश्यकत्वात्तस्य च त्रिधिकल्पनां विनानुपपत्तेः तदप्यावश्यकम् । तदेतदवघातादिविधावगत्याङ्गीकृतम् । प्रकृते त्वप्रकृतग्रहणेऽपूर्वसम्बन्धस्य तत्साधनीभूतसम्बन्धस्य च उभयस्यापि श्रूयमाणेन विधिना श्रुत्यर्थाभ्यां करणे गौरवापत्तेः प्रकृतग्रहणे च तत्राप्यपूर्वसम्बन्धस्य क्लृप्तत्वात् केवलमपूर्वसाधनीभूतसम्बन्धमात्रस्य करणेन लाघवोपपत्तेस्तद्ग्रहणमेव लाघवोपजीविनी विधिश्रुतिरनुमन्यते ।

अत एव यद्यप्यपूर्वसम्बन्धस्स्वकल्पकेन विशेष्योपस्थितेन च कार्यान्तरसम्बन्धेनैव निराकाङ्क्षः, तथापि चैतदाकाङ्क्षयैव तदुपजीवनं नानुपपन्नम् ।

यद्यपि च प्रकृताग्नेयीमन्त्रस्यापि स्तोत्रापूर्वसम्बन्धक्लृप्ताव-प्युपस्थानजन्यापूर्वसम्बन्धकल्पनावश्यंभावेन गौरवस्याविशिष्ट-त्वान्नानया युक्त्या प्रकृतनियमस्सिद्धान्तयितुं शक्यते तथापि यत्र ब्रह्मौदनप्राशनाङ्गभूतब्राह्मणविधौ प्राशनस्य प्रतिपत्तित्वेन दृष्टार्थत्वादाधानाद्यपूर्वसाधनलक्षणा तत्र तदपूर्वसम्बन्धस्य ऋत्विजां प्रयोगाङ्गत्वेन नित्यप्राप्तत्वात्प्रकृतग्रहणोपपत्तिः ।

अत एव यत्रा 'त्रेयाय हिरण्यं ददाती'त्यादावृत्विक्त्वात्रे-यस्य न नियता प्राप्तिः तत्र विधिश्रुतेरपूर्वसम्बन्धाक्षेपकत्वस्या-वश्यकत्वान्न कदाचित्प्रकृतसत्त्वेऽपि तन्नियमः । तस्मादाक्षेपणी-यापूर्वसम्बन्धस्य कार्यान्तरार्थत्वमप्यन्यत्र नियमेन क्लृप्तौ तन्मा-त्रोपजीवनेनान्यत्र कार्यान्तरसम्बन्धमात्रकरणमित्येतस्यैतद-धिकरणन्यायस्याग्नेयीरूपोदाहरणासम्भवेऽपि न विघातः ।

अत एवा''ग्निमुपनिधाय स्तुवीते''त्यादावाक्षेपणीयस्तोत्रा-पूर्वसम्बन्धस्याहवनीयादावप्राप्तत्वान्न तन्नियमः । प्रत्युताहवनी-याद्वचनं विना बहिर्नयने दोषश्रवणाल्लौकिकाग्निनियम एवेति सप्तमे वक्ष्यते । आग्नेयीवाक्ये प्रकृतनियमसाधनप्रकारस्तु यद्य-न्विष्यमाणोऽप्याक्षेपणीयापूर्वसाधनीभूतकार्यान्तरार्थत्वेन विनि-योगो नैव लभ्यते तदैवम् । आग्नेयीतितद्धितस्य सन्निहितप-रामर्शित्वात्प्रकृतग्रहणमिति ।

न चैकस्मिन्नपि प्रकरणे प्रदेशान्तरस्थत्वेनासम्बन्धिवा-क्यान्तरव्यवधानात्सन्निहितपरामर्शित्वबाधः । स्वपदसन्निहिता-भावे स्ववाक्यसन्निहितपरामर्शित्ववत्स्ववाक्यसन्निहिताभावे व्य-

वहितवाक्यसंनिहितपरामर्शित्ववच्च तस्याप्यभावे तद्धितेनैकप्रकरणव्यवहितवाक्यसंनिहितमात्रपरामर्शस्योपपत्तौ तद्बाधे प्रमाणाभावात् ।

न च संनिहितस्यापि निराकाङ्क्षस्य न परामर्शः । सर्वनामादिस्थले "एष वाव प्रथमो यज्ञो यज्ञाना"मित्यादौ निराकाङ्क्षस्याप्यन्यतराकाङ्क्षया संनिहितत्वमात्रे परामर्शव्युत्पत्तेः ।

किञ्चाग्नेयीनां कासाञ्चिद्विशिष्य स्तोत्रादौ विनियोगेऽपि ज्योतिष्टोमप्रकरणे पार्थक्येन पाठस्यापि सत्त्वात्तद्बलेन च तासां ज्योतिष्टोमापूर्वसम्बन्धस्यापि क्लृप्तेरुपस्थानवाक्येन लाघवोपजीविना तासामेव ग्रहणमित्यपि सुवचम् ।

सूत्रमपि तदाख्योऽधिकृत एव मन्त्रादिं नियम्येत । आग्नेयीस्थले तावत्प्रकरणस्थत्वमात्रेण तद्धितेन तत्परामर्शात्प्रकरणपाठेन ज्योतिष्टोमापूर्वसम्बन्धस्य क्लृप्तेश्चान्यत्र च ब्रह्मौदनप्राशनादिविधौ लाघवाख्योपपत्तेरपि सत्त्वाच्चेति व्याख्येयम् ॥

सू–अनर्थकश्चोपदेशस्स्यादसम्बन्धात्फलवत्ता नह्युपस्थानं फलवत ॥३–२–२३॥

ननु–नात्रापूर्वसाधनीभूतोपस्थानत्वेनोद्देश्यता येनापूर्वसम्बन्धलाभार्थं प्रकृतिनियमस्स्यात् । आग्नीध्रोपस्थानस्य क्रत्वनैकान्तिकत्वाभावेनाधानवत्तत्स्वरूपार्थत्वेऽपि मन्त्रस्य बाधकाभावात् । अतश्चोपस्थानजन्यापूर्वार्थत्वस्यैवाभावे सुतरां ज्योतिष्टोमापूर्वार्थत्वाभावात् किमर्थं पाठोपजीवनमिति चेत् न; उपस्थानस्वरूपार्थत्वे यागादिस्वरूपार्थत्ववन्मन्त्रोपदेशस्यानर्थक्यापत्तेः । आहवनीयादीनां त्वदृष्टघटितत्वान्न तदिति विशेषः । अतश्चापूर्वसाधनलक्षणा तावदावश्यक्येव । तत्राऽपि यद्युपस्थानस्यादृष्टार्थत्वं स्या-

त्तदा तन्मन्त्रस्यापि प्रोक्षणमन्त्रवदुपस्थानजन्याहष्टार्थत्वमेव दीक्षणीयावाङ्गनियमन्यायेन भवतु तस्य त्वभिधानफलकस्य करिष्यमाणमण्डपवृत्तिपदार्थानुष्ठानोपयोगितया दृष्टार्थत्वादवघातमन्त्रवदेव तन्मन्त्रस्य क्रत्वपूर्वार्थत्वमावश्यकम् । अतश्च तल्लाभार्थं युक्तं प्रकरणपाठोपजीवनमिति ।

यदा त्वाग्नीध्रोद्देशेनैव मन्त्रविधिः, उपस्थानं तु मन्त्रस्याभिधानमात्रव्यापारकत्वस्वाभाव्यादग्न आयाहीत्याद्यामन्त्रणाविभक्त्यादेश्च समीपस्थितत्याक्षेपकत्वात्प्राप्तमिति पक्षस्समाश्रीयते, तदा आग्नीध्रस्वरूपस्य जुहूवत्क्रतत्वव्यभिचारेऽपि लौकिकत्वेन तस्मिन्नानर्थक्यादपूर्वसाधनलक्षणार्थं प्रकरणपाठाद्युपजीवनमावश्यकमेव । अतो युक्तमेव प्रकृतग्रहणम् । सूत्रं स्पष्टम् ॥

यत्तु प्रकृतानां स्तोत्रादिप्रयोजनान्तरनिराकाङ्क्षत्वात्प्रयोजनसाकाङ्क्षाणामप्रकृतानामेव ग्रहणमित्युक्तम् । तत्राह—

सू—सर्वेषां चोपदिष्टत्वात ॥ ३—२—२३ ॥

वाचस्तोमादौ सर्वेषामेव मन्त्राणामुपदिष्टत्वेन निराकाङ्क्षत्वाविशेषादित्याशयः । प्रयोजनं स्पष्टम् ॥

इति अष्टममाग्नेय्यधिकरणम् ॥

अथ नवमं भक्षाधिकरणम् ॥ ९ ॥ (भक्षपेटिका)

सू—लिङ्गसमाख्यानाभ्यां भक्षार्थताऽनुवाकस्य ॥ ३–२–२४ ॥ (पू)

(विषयः)

ज्योतिष्टोमे—"(१)भक्षेहि मा विश दीर्घायुत्वाय शंतनुत्वाय रायस्पोषाय वर्चसे सुप्रजास्त्वायेहि वसो पुरावसो प्रियो मे हृदोऽस्यश्विनोस्त्वा बाहुभ्यां सघ्यासं नृचक्षसं त्वा देव सोम सुचक्षा अवख्येषं" "हिन्व मे गात्रा हरिवो गणान्मे मा वितीतृषः । शिवो मे सप्तऋषीनुपतिष्ठस्व मा मे वाङ्नाभिमतिगाः" "मन्द्राभिभूतिः केतुर्यज्ञानां वाक् जुषाणा सोमस्य तृप्यतु", वसुमद्गणस्य, रुद्रवद्गणस्यादित्यवद्गणस्य, सोम देव ते मतिविदः प्रातस्सवनस्य, माध्यंदिनस्य सवनस्य, तृतीयस्य सवनस्य गायत्रच्छन्दसस्त्रिष्टुप्छन्दसो जगतीच्छन्दसोऽग्निहुत इन्द्रपीतस्य नराशंसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामी"त्ययं मन्त्रो भक्षानुवाक इत्येवं समाख्यातस्समाम्नातः ।

(संशयः)

तत्र मन्द्राभिभूतिरित्यादिर्भक्षयामीत्यन्तस्तावद्भक्षण एव विनियुज्यत इत्यविवादः । साधयिष्यते चोत्तराधिकरणे । पूर्वावयवानां तु किं भक्षमन्त्रैकवाक्यतया भक्षण एव विनियोगः ? अथ वा सघ्यासमित्यन्तो ग्रहणे नृचक्षसमित्यादिरवख्येषमित्यन्तोऽवेक्षणे, 'हिन्वे'त्यादि'रतिगा' इत्यन्तश्च सम्यक्जरण इत्येवं सन्देहः ।

---

१. तै. सं. ३. २. ५.

(सङ्गतिः)

सिद्धान्ते लिङ्गविनियोगसत्त्वात्तदुपयोग्युद्देश्यतावच्छेदक-निरूपणाच्च पादाध्यायसङ्गतिः ।

अनन्तरा तु क्रतुसम्बन्धरहितद्वारसम्बन्धानुपपत्तेः प्रकृत-ग्रहणेऽभिहिते प्रकृतेतरग्रहणादेरपूर्वसम्बन्धाभावान्न द्वारतेत्येवं पूर्वपक्षोत्थानाद्द्रष्टव्या ।

(पूर्वपक्षः)

तत्र यद्यपि ग्रहणाद्यर्थत्वे लिङ्गमस्ति प्रमाणं तथापि ग्रह-णादिस्वरूपार्थत्वे मन्त्रनियमस्यानर्थक्यापत्तेर्ग्रहणादेरविहितत्वे-न चापूर्वं प्रत्यङ्गत्ववत्साधनत्वस्याप्ययोगादपूर्वसाधनत्वलक्षणा-या अप्यनुपपत्तेः उद्देश्यत्वासंम्भवान्न ग्रहणाद्यङ्गत्वेन मन्त्र-विधिर्युक्तः ।

न च साधनत्वासम्भवेऽप्यपूर्वप्रयोजकत्वस्य तावत्सत्त्वा-त्तेन रूपेणोद्देश्यत्वोपपत्तिः ; अवेक्षणस्य भक्षणाजनकत्वेन तद-भावाद्ग्रहणस्यापि नैयत्येन भक्षणजनकत्वाभावाच्च कथञ्चिद्वा ग्रहणमात्रस्य पाक्षिकप्राप्तौ बाहुद्वयकरणकत्वस्य कथमप्यप्राप्ते-श्च । सम्यग्जरणस्य तदनुकूलव्यापारस्य वा भक्षणजनकत्वं तूत्तरकालीनत्वाद्व्याहतमेव । अतोऽपूर्वप्रयोजकत्वस्याभावान्न त-त्त्वेनाप्युद्देश्यता ।

न च सम्यग्जरणस्य भक्षणजनकत्वाभावेऽपि तज्जन्यत्व-सत्त्वात् स्वर्गमन्त्रे स्वर्गस्येवापूर्वजनकजन्यत्वेन द्वारत्वोपपत्तिः । सम्यग्जरणस्य भक्षणजन्यत्वेऽपि गलकबलसंयोगरूपस्य भक्ष-णस्यात्र हविःप्रतिपत्त्यर्थत्वेन सम्यग्जरणफलकत्वाभावात्तत्प्र-काशनस्योपयोगाभावेनानुपपत्तेः । अतो न लिङ्गाद्ग्रहणार्थत्वम् ।

अत एव च बलाबलाधिकरणवक्ष्यमाणलिङ्गबलीयस्त्वेनापि न पौनरुक्त्यम् ।

वस्तुतस्तु नात्र लिङ्गमपि मुख्यमस्ति । सघेर्हिंसार्थत्वस्मरणेन ग्रहणवाचित्वाभावात् । चक्षिङो भाषणार्थत्वस्मरणेनावेक्षणार्थतानुपपत्तेश्च हिनोतेर्गत्यर्थत्वान्न सम्यग्जरणार्थत्वमपि । अतश्च ग्रहणाद्यर्थत्वेऽपि लक्षणापत्तेर्वरं विहितभक्षणलक्षकत्वमेव ।

वस्तुतस्तु न तदपि, देवस्य त्वेत्यादिपदवत्स्वशक्यार्थस्यैव भक्षणविशेषणत्वोपपत्तेः तद्वदेव च तादृशभक्षणप्रतिपादनस्याभ्युदयकारित्वकल्पनान्नानर्थक्यमपि ।

यद्यपि चाख्यातभेदान्न तद्वदिह विशिष्टशाब्दबोधप्रयोजकीभूताकाङ्क्षारूपलिङ्गसत्त्वं तथा'प्येकं वृणीत' इत्यादिवदेकवाक्यतालाभार्थमासक्तिमात्रेण तत्कल्पनमपि नानुपपन्नम् ।

वस्तुतस्तु सत्यप्याख्यातभेदे उपक्रमोपसंहारैक्ये सत्येकवाक्यताप्रयोजकीभूताकाङ्क्षासत्त्वस्य वैश्वानरवाक्यादौ व्युत्पादनात् तत्रापि च भक्षेहीत्यादिना भक्षस्यैवोपक्रमात् 'भक्षयामी'त्यनेन तस्यैवोपसंहारादुपक्रमोपसंहारैक्यावगतेरेकवाक्यताप्रयोजकीभूताकाङ्क्षारूपलिङ्गोपपत्तिः । इदमेव च मूले वाक्यतोपगमनसामर्थ्यपदेन व्यवहृतम् ।

न च 'भक्षेही'त्यस्य ग्रहणार्थत्वेऽप्युपपत्तेरेकान्तत उभयोर्भक्षमात्रविषयत्वानुपपत्तिः । भक्षणस्यैव दीर्घायुष्ट्वादिफलकत्वात्तदन्वयानुरोधेनैवोपक्रमस्य भक्षणार्थत्वावधारणोपपत्तेः । अतश्च युक्त्यैवोक्तविधलिङ्गादेकवाक्यत्वादि कल्पयित्वा सर्वस्यापि भक्षणार्थता ।

एवं च भक्षानुवाकसमाख्यापि मुख्यवृत्त्यैवोपपन्ना भवि-

ष्यति । इतरथा भक्षसमुदायाश्रयिषु लिङ्गसमवायाद्भक्षशब्दो गौणस्स्यात् । अतश्च सर्वस्याप्यनुवाकस्य भक्षार्थत्वमेव । सूत्रं स्पष्टम् ॥

(इति पूर्वपक्षः)

(अथ सिद्धान्तः)

सू—तस्य रूपोपदेशाभ्यामपकर्षोऽर्थस्य चोदितत्वात ॥३—२—२५॥ (सि)

न सर्वस्य भक्षणे विनियोगः । किन्तु तत्तदवयवानाम् । तस्मादपकर्ष एव । तत्तदाख्यातेन तत्तदर्थस्य मुख्यविशेष्यतया प्रतीतेरर्थाभिधानरूपेण लिङ्गेन ग्रहणाद्यर्थत्वनिश्चयात् ।

यद्यपि चात्रोपक्रमोपसंहाराभ्यामेकवाक्यतोपगमनसामर्थ्यरूपं लिङ्गं क्लृप्तमित्येकवाक्यतावगमस्स्यात्तथापि ग्रहणादिप्रकाशकस्य मन्त्रभागस्य वाक्येनैव भक्षणाङ्गतेति ततोऽपि प्रबलादर्थाभिधानलिङ्गाद्ग्रहणाद्यङ्गत्वनिश्चयस्सुलभ एव । वैश्वानरादिवाक्येषु नैवंविधं किञ्चिदस्ति प्रबलं वाक्यभेदसाधकमिति न तदङ्गीकारः ।

वस्तुतस्तूपक्रमस्य साधारणत्वात् प्रत्युत मुख्यसामर्थ्यानुरोधेन ग्रहणविषय एवोपपत्तेर्नात्रैकवाक्यतोपगमनसामर्थ्यमपि।

यत्तु दीर्घायुत्वेत्यादेरनन्वय एव भक्षणार्थत्वतात्पर्यग्राहक इत्युक्तम् । तस्य ग्रहणफलीभूतभक्षणफलत्वेनापि स्तावकतयान्वयोपपत्तेरसाधकम् ।

यत्तु सहयादेर्हिंसाद्यर्थकत्वान्न ग्रहणादौ मुख्यसामर्थ्यमस्तीत्युक्तम् , तन्न; भूसत्तायामितिवत्तद्ग्रहणादावपि वृद्धप्रयोगेण

स्मृतेरुपलक्षणत्वान्मुख्यसामर्थ्योपपत्तेः, प्रकृते च दृष्टार्थतालाभाय ग्रहणाद्यर्थत्वानिर्णयोपपत्तेश्च। हिनोतेस्तु गत्यर्थतास्मरणेनैव सम्यग्जरणफलकतावगतिः। मे गात्राणि हिन्व गच्छ गणानीन्द्रियाणि मा वितृष्णान कुरु सप्तऋषीन् सप्त प्राणानुपतिष्ठस्व वाङ्नाभिमतिक्रम्य च मा गा इत्येवमर्थावगमाद्गात्रगमनफलीभूतसम्यग्जरणावगतिस्सुलभैव। अतो मुख्यसामर्थ्यं युक्तमेव।

यत्तु ग्रहणादेरपूर्वसम्बन्धस्य नियतप्राप्त्यभावान्नोद्देश्यतेत्युक्तम्। तन्न ग्रहणादेर्भक्षविध्याक्षेपेण नियमप्राप्त्यभावेऽपि तत्तन्मन्त्राणां समाख्यासहकृतावान्तरप्रकरणेन भक्षाङ्गत्वेऽवगते तदङ्गत्वेन मान्त्रवर्णिकक्रियाविधिकल्पनोपपत्ते बाहुभ्यां गृहीत्वावेक्षे सम्यग्जरणायेत्येतान्येव वा पदानि भक्षविध्येकवाक्यतया कल्प्यन्ते। तत्र च बहुत्वांशेऽपूर्वविधिः, ग्रहणांशे नियमविधिः, अवेक्षणांशे त्वपूर्वविधिरदृष्टार्थत्वं च। अस्तु वा वमनविरेकसाधनीभूतद्रव्यसंसर्गपरिहारार्थत्वेनावेक्षणविधिर्दृष्टार्थ एव। अवेक्षणस्य दृष्टार्थत्वलाभायैव च भक्षणस्यापि सम्यग्जरणपर्यन्तस्यैव भक्षणविधिना विधानम्। वमनविरेकनिमित्तकप्रायश्चित्तास्नानादेव सम्यग्जरणपर्यन्तस्य भक्षणस्य प्रतिपत्तित्वावगतिः सम्यग्जरणमन्त्रस्यैव च मान्त्रवर्णिकसम्यग्जरणपर्यन्तत्वकल्पकत्वम्। भक्षणे च कदाचित्सम्यग्जरणपर्यन्तत्वस्य स्वतस्सिद्धत्वेऽपि नैयत्येन तत्सिद्धिफलकता मन्त्रस्य न विरुध्यते। नैयत्येन तत्सिद्धिश्च न भक्षणमात्रेणेति सम्यग्जरणविरोधिविनाडीगतिप्रतिबन्धकफलाजेवावस्थानरूपव्यापारोऽपि तेनैवाक्षिप्यते।

यद्यपि चासौ कदाचिदेवापेक्षितः तथापि विनाडीतिरूपप्रतिबन्धकसम्भावनायां नित्यमनुष्ठेयत्वाद्युक्तस्तत्स्मारकतया नैयत्येन मन्त्रविनियोगः।

यद्यपि च भक्षमन्त्रेण भक्षणस्मरणसत्त्वे तेषामपि ग्रहणादीनां स्मरणं संभाव्यते तथापि तत्तन्मन्त्राम्नानात्तन्नियमोपपत्तिः ।

यद्यपि चाग्नये जुष्टमिति मन्त्रस्याग्निदेवताकनिर्वापप्रकाशकत्ववदस्यापि ग्रहणादिविशिष्टभक्षणप्रकाशकत्वाङ्गीकारेण मन्त्रैकत्वमभ्युपगम्यापि ग्रहणाद्यङ्गत्वं शक्येत वक्तुम् , तथाप्युपक्रमोपसंहारैक्यादिरूपैकवाक्यतोपगमनसामर्थ्याभावे स्वरसतः प्रतीयमानतत्तदाख्यातगतमुख्यविशेष्यार्थकत्वबाधे प्रमाणाभावात् नात्र भेदाङ्गीकारः । 'एकं वृणीते' इत्यादौ तु सत्यप्याख्यातभेदे विकल्पपरिहारार्थं सर्वेषां विधित्वकल्पनागौरवपरिहारार्थञ्चैकवाक्यत्वाभ्युपगमः । तस्माद्युक्तं भेदेनैव ग्रहणाद्यङ्गत्वम् । समाख्या तु भक्षसम्बन्ध्यनुवाक इति साक्षात्परंपरासाधारण्येनाप्युपपन्ना । समाख्याबलादेव हि मान्त्रवर्णिकग्रहणादेर्भक्षाङ्गत्वासिद्धिः । अन्यथा हि महाप्रकरणात् ज्योतिष्टोमसम्बन्धिग्रहणमात्राङ्गतापत्तिः

अस्तु वा अवान्तरप्रकरणादेव तदङ्गत्वम् । तथापि अनुवादरूपा सती नानुपपन्नैव ॥

प्रयोजनं पूर्वपक्षे ग्रहणमन्त्रादेर्नैयत्याभावः । पाठक्रमेण च मन्त्रपाठान्ते भक्षणम् । सिद्धान्ते तु ग्रहणादेर्नैयत्येन तत्तन्मन्त्रान्तेऽनुष्ठानम् । हिन्वेत्यस्य च भक्षणान्तेऽर्थक्रमानुरोधेन पाठः इति स्पष्टम् । सूत्रे रूपपदेन लिङ्गं उद्देशपदेन सामान्यसम्बन्धबोधकं प्रमाणं विवक्षितम् । अन्यत्स्पष्टम् ॥

इति नवमं लिङ्गसमाख्याधिकरणम् ॥

(भक्षाधिकरणम्)

अथ दशमं गुणाभिधानाधिकरणम् ॥ (१०)

सू—गुणाभिधानान्मन्द्रादिरेकमन्त्रस्स्यात् तयोरेकार्थसंयोगात् ॥ ३-२-२६ ॥

(विषयसंशयसङ्गतयः)

तस्मिन्नेवानुवाके किं 'मन्द्राभिभूति'रित्यादिः तृप्यत्वित्यन्तः तृप्तौ विनियोक्तव्यः ? उत भक्षमन्त्रैकवाक्यतया भक्षण इति सन्देहः । पादाध्यायसङ्गती पूर्ववत् । आपवादिकी त्वनन्तरा ।

(पूर्वपक्षः)

तत्र पूर्ववदेव लिङ्गात् तृप्त्यङ्गत्वम् । न च तस्या भक्षणानुनिष्पन्नत्वेनाननुष्ठेयाया अङ्गित्वानुपपत्तिः । ग्रहणादिवदननुष्ठेयत्वेऽपि सम्यग्जरणवत् तदनुकूलव्यापारस्य भक्षणगतबाहुल्यस्य कृतिसाध्यत्वेनानुष्ठेयत्वोपपत्तेः । अत एव तद्वदिह मन्त्राम्नानसामर्थ्यात् भक्षणस्य तृप्तिपर्यन्तत्वसिद्धिः । तस्य च भक्षणगतबाहुल्यं विनाऽसिद्धेः तन्नियमाक्षेपकत्वमपि ।

अस्तु वा कथमपि तृप्तेरननुष्ठेयत्वम् । तथापि तस्या भक्षणजन्यायाः स्वर्गवन्मन्त्रप्रकाश्यत्वोपपत्तिः । यद्यपि सोमप्रतिपत्त्यर्थत्वात् भक्षणस्य तृप्तिर्न मुख्यं फलम्, तथापि पुरोडाशादिभक्षणवत् कर्तृनियमांशेन क्रियात एव वा कर्तव्यानुष्ठानसामर्थ्यजनकतृप्तिरूपभक्षयितृसंस्कारार्थत्वस्याप्यानुषङ्गिकस्य वक्ष्यमाणत्वात् फलत्वाविघातेन मन्त्रप्रकाश्यत्वोपपत्तिः । यदि कर्तव्यानुष्ठानसामर्थ्याधानाख्य एव भक्षयितुः संस्कार उच्यते ततोऽस्तु तर्पयतिना तल्लक्षणा । सर्वथा स्वतन्त्राख्यातस्यैकवाक्यत्वकल्पना निष्प्रमाणिकैवेत्येवं प्राप्ते—

(सिद्धान्तः)

ब्रूमः—'अल्पं भक्षयती' त्यनेनैव भक्षणगतबाहुल्यस्य तृप्तिजनकस्य पर्युदस्तत्वात् न तावत् भक्षणे सम्यग्जरणपर्यन्तत्वस्येव तृप्तिपर्यन्तत्वस्य कल्पनावसरः । अत एव तृप्तेर्भक्षणेनाजननान्न तस्याः स्वर्गवज्जन्यत्वमात्रेण प्रकाश्यत्वोपपत्तिः । फलत्वं त्वस्याः सोमप्रतिपत्त्यर्थत्वात् भक्षणस्य दूरभ्रष्टमेव । न हि तृप्तिकर्तव्यानुष्ठानसामर्थ्यजनकतयाप्यानुषङ्गिकं फलम् । तृप्त्यभावेऽपि भक्षणेनौषधविधयाप्यनुष्ठाने सामर्थ्यजननात् । अत एव तावन्मात्रमेवानुषङ्गिकं फलम्, न तु तृप्तिपर्यन्तम् । तावन्मात्रस्यापि च न स्वर्गवत्प्रकाशनार्हत्वं, येन तर्पयतिना लक्षणयापि प्रकाश्येत । अनुष्ठानसामर्थ्यजननस्य दृष्टफलत्वेनासम्भवितत्वाशङ्काभावात् तन्निश्चयरूपश्रद्धाजननार्थं स्मारकमन्त्रानपेक्षणात् । स्वर्गस्य त्वदृष्टफलत्वात् तदिति वैषम्यम् । अतश्च लिङ्गविनियोगासम्भवात् असत्यप्येकवाक्येनोपगमनरूपे लिङ्गे स्पष्टे" एकं वृणीत" इतिवत् कथञ्चित् तदनुमायैकवाक्यताकल्पनादिद्वारा स्वार्थस्य भक्षविशेषणत्वप्रतिपादनार्थं एवायं मन्त्रैकदेशः । स्वतन्त्राख्यातश्रवणेऽपि च तृप्तेरितिकरणाद्यध्याहारेण भक्षणविशेषणत्वोपपत्तिः—तृप्यत्वित्येतदर्थं भक्षयामीति । सर्वस्य मन्त्रस्य स्वार्थविशिष्टभक्षणप्रकाशकत्वात् विशेष्यांशे दृष्टार्थत्वेऽपि विशेषणांशेऽदृष्टार्थत्वाङ्गीकारान्न वैयर्थ्यम् ।

अथ वा तृप्यत्वित्यादिना लक्षणया भक्षणस्तुतिरदृष्टार्था । अतश्च सर्वोऽपि मन्त्रः प्राशस्त्यविशिष्टभक्षणं प्रतिपादयति । अस्मिंश्च पक्षे लोट् प्राप्तकालत्वे प्रार्थनायां वा द्रष्टव्यः । तस्मात् तृप्तिपरस्यापि भक्षमन्त्रैकवाक्यतया भक्षणाङ्गत्वमेवेति सिद्धम् ॥

प्रयोजनं पूर्वपक्षे समन्त्रं भक्षणं कृत्वा तृप्तिमन्त्रपाठः ।

सिद्धान्ते तु यथाम्नानमिति ॥

सूत्रं तु लिङ्गविनियोगासम्भवात् मन्द्रादिर्भक्षयाम्यन्त एव मन्त्रः स्यात् । गुणस्य तृप्तिरूपस्य विशेषणस्य प्राशस्त्यस्य वाऽभिधानेन तयोर्मन्त्रभागयोः विशिष्टैकार्थद्वात्तित्वोपपत्तेरिति व्याख्येयम् ॥

इति दशमं गुणाभिधानाधिकरणम् ॥

अथैकादशमिन्द्रपीताधिकरणम् ॥ (११)

सू—लिङ्गविशेषनिर्देशात् समानविधानेष्वनैन्द्राणाममन्त्रत्वम् ॥३–२–२७॥ (पू)

(विषयसंशयौ)

भक्षमन्त्र एव किं लिङ्गादिन्द्रदेवत्ययागाभ्यासमात्राङ्गम् । तद्भिन्नाभ्यासानां तु अमन्त्रकं भक्षणम् ?। उत तेषूहेन मन्त्रः ? उतानूहेनैवेति विचार्यते ।

(सङ्गतिः)

अत्र चानैन्द्रप्रदानेषु लिङ्गप्रमाणकभक्षमन्त्रविनियोगस्य सिद्धान्ताभिप्रेतस्य पूर्वपक्षद्वयेऽप्यनङ्गीकारात् पादाध्यायसङ्गतिः । तेनोहपक्षस्य पादलक्षणासङ्गतत्वान्न स्वतन्त्रकोटित्वम् । अपित्वाद्यकोटिफलीभूतस्यानैन्द्राणाममन्त्रकत्वस्याक्षेपमात्रमिति न्यायसुधाकारोक्तमपास्तम् । अनैन्द्रप्रदानेषु लिङ्गप्रमाणकमन्त्रविनियोगस्य सिद्धान्त्यभिप्रेतस्य प्रतिपक्षतयोहोपन्यासेन सङ्गत्युपपत्तेः । अस्यापि पूर्वपक्षे फलाक्षेपस्य निष्प्रयोजनत्वाच्च । अनन्तरसङ्गतिस्तु भक्षमन्त्रैकवाक्यतया तृप्तिमन्त्रस्य भक्ष-

णाङ्गत्वेऽभिहिते भक्षमात्रस्यैव किंदेवत्यसोमभक्षणाङ्गतेति विचारात्प्रासङ्गिकी ।

(पूर्वपक्षः)

तत्र न तावत्प्रकरणेन सर्वप्रदानाङ्गभूतभक्षणाङ्गत्वम् । इन्द्रपीतस्येति पदेनेन्द्रदेवत्यसोममात्रप्रकाशनेन लिङ्गात्तद्बाधावगतेः । न च इन्द्रेण यस्मिन् सवने पीत इति बहुव्रीहिमङ्गीकृत्येन्द्रपीतपदस्य सवनविशेषणत्वाङ्गीकारादन्यदेवत्यस्यापि च सोमस्योक्तविधसवनसम्बन्धित्वेन प्रकाशनोपपत्तेर्लिङ्गविरोधात्सर्वार्थत्वोपपत्तिरिति वाच्यम् । इन्द्रपीतपदस्येन्द्रेण पीतस्स्वीकृत इति वा इन्द्राय त्यक्त इति वा तत्पुरुषोपपत्तौ बहुव्रीहेरङ्गीकाराभावात् । तत्पुरुषे हि पूर्वपद एव सम्बन्धिनि लक्षणा, बहुव्रीहौ तु पदद्वयेऽप्यन्यपदार्थे लक्षणेति गौरवम् ।

बहुव्रीहावेकस्मिन्पद एव विशिष्टार्थलक्षणा इतरत्तात्पर्यग्राहकमित्यङ्गीकारेऽपि च लक्ष्यतावच्छेदके गौरवात् । तात्पर्यग्राहकस्य च वाक्यार्थान्वयप्रतिपादकत्वाद्गौरवं समस्त्येव । न ह्यन्यपदार्थे बहुव्रीहेश्शक्तिः, येन तत्पुरुषादपि लाघवं शंक्येत । एकहायन्यादिपदेऽन्यपदार्थलक्षणाया एवास्माभिः प्रतिपादनात् । अस्तु वा तदाप्यवयवार्थोपस्थितिसापेक्षत्वादन्यपदार्थोपस्थितेर्बहुव्रीहौ गौरवम् । सर्वथा तत्पुरुषो लघुभूत एव ।

किञ्च नात्र बहुव्रीहेर्लक्षणानुगमः । "समानाधिकरणानां बहुव्रीहिरिष्यत," इति कात्यायनस्मरणात् व्यधिकरणपदानां तदनुपपत्तेः । (१) "सप्तमी विशेषणे बहुव्रीहा"विति ज्ञापकबलेन हि कण्ठेकाल इत्यादौ सप्तम्यन्त एव स आश्रितः, नान्यत्र । तत्पुरुषे तु

---

१ पा. सू. २-२-३५

(१)“कर्तृकरणे कृता बहुल”मिति स्मरणाल्लक्षणानुगमो नानुपपन्नः। बहुलग्रहणेन कर्तृकरणातिरिक्तस्य कृता समासाभ्युपगमाच्चतुर्थी तत्पुरुषस्याप्युपपत्तेः।

न चैवमपीन्द्रपीतपदे(२)“बहुव्रीहौ प्रकृत्या पूर्वपद”मिति स्मरणानुसारात्पूर्वपदे प्रकृतिस्वरस्यैकारोदात्तत्वस्य बहुव्रीहिज्ञापकस्य वैदिकैः पठ्यमानत्वाद्बहुव्रीहित्वावगतेस्तत्पुरुषाङ्गीकारे चान्तोदात्तत्वापत्तेः कथं तत्पुरुषाङ्गीकरणमिति वाच्यम्। सत्यपि बहुव्रीहिज्ञापके स्वरे प्रधानभूतस्वार्थानुग्रहाय तत्पुरुषावधारणाच्छब्दधर्मस्य स्वरस्यैवाङ्गगुणविरोधन्यायेन “सुप्तिङुपग्रहालिङ्गनराणा” मित्येवं व्यत्ययेन व्याख्यानात्।

यदि तु ‘स्थूलपृषतीमालभेते’त्यादौ महाभाष्यकारेण स्वरान्निर्णयाभिधानात्समासगतलाघवापेक्षयाङ्गधर्मस्यापि स्वरस्यैव प्राबल्यमित्याश्रीयेत तथापीन्द्रपीतपदे बहुव्रीहेरपि सामानाधिकरण्यासम्भवेन स्थूलपृषतीपदवल्लक्षणानुगतत्वाभावादवश्यं समासस्वरयोरन्यतरस्यागतिकत्वे व्याख्येये अङ्गधर्मत्वात्स्वरस्यैव तद्युक्तम्।

वस्तुतस्तु तत्पुरुषेऽपि पठ्यमानस्वरो नैवानुपपन्नः। (३)‘तृतीया कर्मणी”त्यनेन कर्माणि क्तान्त उपपदे परे तृतीयान्तपूर्वपदप्रकृतिस्वरमित्याभिधानात् तृतीयासमासे ऽपि विवक्षितस्वरोपपत्तेः।

यद्यपि चात्र पीतपदे तत्कर्तृलक्षणया चतुर्थीसमासोऽङ्गीक्रियेत तथापि(४)‘चतुर्थी तदर्थे’ इत्यनेन तदुपपात्तिः। यदि तु देवतार्थत्वस्य नवमे निराकरणान्नैतत्प्रवृत्तिरित्याशङ्क्येत तदा

१ पा. सू. २-२-३२ २ पा. सू. ६-२-१
३ पा. सू. ६-२-४८ ४ पा. सू. ६-२-४३

'क्ते चे'ति सूत्रात्पूर्वपदप्रकृतिस्वरत्वसिद्धिर्द्रष्टव्या। अतस्स्वरस्यानिर्णायकत्वाल्लाघवादङ्गभूतसवनपरत्वापत्तेश्च बहुव्रीहित्वानुपपत्तेः प्रधानभूतसोमपरत्वलाभाय तत्पुरुषाङ्गीकरणमेव युक्तम्। ततश्चानिन्द्रदेवत्यसोमभक्षणे लिङ्गविनियोगासम्भवान्न तावदुपदेशप्रमाणेनैव मन्त्रप्राप्तिः।

नाप्यतिदेशप्रमाणेनोहितस्य। यागाख्यकर्मण एकत्वेन प्रकरणाविशेषाच्च अन्येषां धर्माणां सर्वार्थत्वावगतेरभ्यासानां प्रकृतिविकारभावानुपपत्तेः। अतश्च सत्यपि सामान्यविधौ "व्रीहीणां मेध सुमनस्यमान" इति मन्त्रवदिन्द्रलिङ्गकानां मन्त्राणामिन्द्रदेवत्यसोममात्रभक्षाद्यङ्गत्वावगतेरन्येषाममन्त्रकमेव भक्षणम्। सूत्रं स्पष्टम्॥

अत्र च सूत्रे भाष्यादौ यद्यपीन्द्रमात्रभिन्नस्यामन्त्रकता प्रतीयते तथापि लिङ्गाविशेषात् पितृदेवत्यप्रदानेषु पितृपीतपदयुक्तस्य नराशंसदेवत्यप्रदानेषु च नराशंसपीतपदयुक्तस्य विभज्य सूक्तवाकवद्विनियोगावधारणादिन्द्रादिभिन्नप्रदानानाममन्त्रकं भक्षणमित्येवमवगन्तव्यम्।

न च नाराशंसदेवत्यप्रदानस्य बौधायनीयादिकल्पेष्वदर्शनादभावः। वार्तिककृता सिद्धान्ते प्रातस्सवनादिशब्दानां तत्समानाधिकरणानां च वसुमद्गणादिशब्दानां गायत्रच्छन्दःप्रभृतीनामिन्द्रपीतादीनां च प्रतिसवनं क्रमेण विभज्य विनियोगाभिधानेन माध्यन्दिने सवने नाराशंसदेवत्यप्रदानस्यावश्यकत्वेन कल्पान्तरे तत्सद्भावकल्पनोपपत्तेः। अतश्च सवनत्रयस्थेऽप्यैन्द्रप्रदाने प्रातस्सवनादिशब्दानां सामानाधिकरण्यपदान्तरयुक्तानां विनियोगे यथासवनं विभज्य प्रयोगेऽपीन्द्रपीतपदस्य सवनत्रयेऽपि प्रयोगः।

एवं नाराशंसदेवत्ये पितृदेवत्येऽपि द्रष्टव्यम् । तद्भिन्नानां तु यवेष्विवामन्त्रकत्वम् ॥

(इति प्रथमः पूर्वपक्षः)

सू—यथादेवतं वा तत्प्रकृतित्वं हि दर्शयति ॥

३-२-२८ ॥

(अथ द्वितीयः पूर्वपक्षः)

सत्यमैन्द्रादिष्वेवोपदेशेन मन्त्रः । तद्भिन्नेष्वपि त्वतिदेशेन संभवन् केन वार्येत । सत्यपि यागैकत्वेऽभ्यासानां भेदाच्छ्रयणादिव्यवस्थावत्प्रकृतिविकृतिभावस्याप्युपपत्तेः ।

न च प्रकरणाविशेषात्पारिप्लवत्वम्, मानग्रहणमन्त्रानुरोधेन धर्माणामैन्द्रमात्रप्रदानविषयत्वोपपत्तेः । तथाहि—"इन्द्राय त्वा वसुमते सोमं मिनोमि। इन्द्राय त्वा वसुमते सोमं गृह्णामी" ति सोममानग्रहणमन्त्रयोस्तावल्लिङ्गादैन्द्रप्रदानीयसोममानाद्यङ्गत्वं वादित्रयसिद्धम् । अतस्तत्प्रकाश्ययोर्मानग्रहणयोरपि तन्मात्राङ्गत्वम् । इष्यते च सर्वविषयतया संभाव्यमानस्यापि प्रधानस्याङ्गानुरोधेनाल्पविषयत्वम्। अर्थिमात्रविषयत्वेन प्रतीयमानानामपि क्रतुविधीनामङ्गभूताग्निविद्याजनकाधानाध्ययनानुरोधेन त्रैवर्णिकमात्रविषयत्वाङ्गीकारात् । अत एव मानग्रहणसंस्कार्यस्य सोमस्यापि तन्मात्राङ्गत्वम् । एवं चोत्पत्तिवाक्ये सोमो विजातीययागत्वसामानाधिकरण्येनैव विधीयते न त्ववच्छेदकावच्छेदेन ।

अथ वा नैव तत्र सोमविधिः । संस्कारविध्यनुपपत्त्यैवेन्द्रप्रदानाङ्गतायाः प्राप्तिसम्भवात् । अतश्चोत्पत्तिवाक्यस्थं सोमपदमप्युपदेशातिदेशप्रापितसोमानुवादमात्रमिसपि ध्येयम् ।

सोमधर्माणां त्वभिषवादीनां तन्मात्रार्थत्वं निरङ्कुशमेव । तत्संवलितत्वाच्च दीक्षणीयादयोऽपि तन्मात्राङ्गमेवेत्यनैन्द्रप्रदानानां द्रव्यादिधर्मसाकाङ्क्षाणामव्यक्तत्वसामान्यादैन्द्रप्रदानविकृतित्वोपपत्तेरतिदेशप्राप्तस्य भक्षमन्त्रस्य समवेतार्थत्वादूहन्यायेनोहितस्य प्रयोगस्तत्र नानुपपन्नः ।

एवं च नाराशंसदेवत्यपितृदेवत्यप्रदानेष्वप्यूहेनैव भक्षमन्त्रप्राप्त्युपपत्तौ पुनस्तदाम्नानमूहितस्य मन्त्रत्वसिद्ध्यर्थं न विरुध्यते। एवं च षोडशिन्यतिरात्रे च पितृदेवत्येऽनुष्टुप्छन्दस इति भक्षमन्त्रं नयतीति सामान्यतोऽस्मिन् मन्त्रे पदान्तरनिष्ठतयोहस्य प्राप्तत्वात्तद्विशेषस्य जगतीच्छन्दःपदेऽनुष्टुप्छन्दःपदोहरूपस्य विधानमवकल्पते । इतरथा षोडशिन्यतिरात्रे च भक्षमन्त्रस्यानूहितस्यैव पितृदेवत्यप्रदानत्वेन प्राप्तेर्विशेषविधानं नोपपद्येत।

यद्यपि चाग्निष्टोमान्तप्रदानानामेव समानविधानत्वमिति तत्रत्यपितृदेवत्यप्रदान एव पितृपीतपदयुक्तो मन्त्रः उपदेशेन प्राप्यते तथापि षोडश्यतिरात्रयोस्तार्तीयसवनिकपितृदेवत्यप्रदानविकृतित्वस्यैव सादृश्यविशेषेणावगतेरनूहितस्यैव भक्षमन्त्रस्यातिदेशेन प्राप्त्यापत्तेः विशिष्टविधाने गौरवापत्तिः ।

एवं सवनविशेषणत्वसिद्धान्तेऽपि द्रष्टव्यम् । अस्मन्मते त्वैन्द्रप्रदानस्यैव प्रकृतित्वाद्विकृतौ सत्यपि मन्त्रत्वसिद्ध्यर्थे तदुपदेशे वस्तुतः प्रकृतिप्राप्ते इन्द्रपदस्थानापन्नत्वेन पितृपदस्योहत्वोपपत्तेः युक्तं तद्घटितमन्त्रे ऊहविशेषविधानम् ।

यद्यपि च जगतीच्छन्दःपदे ऊहस्याप्रसक्तत्वान्न तदनुवादेनानुष्टुप्छन्दःपदमात्रविधिर्ममापि शक्यते वक्तुं तथाप्यस्मिन्मन्त्रे पदान्तरेऽपि तावदूहस्य मन्मते प्राप्तत्वाद्युक्तस्तत्रानुष्टुप्पदविशिष्टोहविधिः । छन्दःपदवत्त्वसाधर्म्याच्च जगती-

पदस्थानत्वलाभः। वार्तिकमप्येवमेव व्याख्येयम् । तस्माद्यथादेवतमूहेन प्रयोगः ॥ सूत्रं स्पष्टम् ॥

(इति द्वितीयः पूर्वपक्षः)

(अत्रान्तरागार्भिणीत्वेन पञ्चाधिकरणानि । तत्र प्रथममभ्युन्नीताधिकरणम् ।) १२ ॥

सू–पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् ॥ ३–२–२९ ॥

(विषयसंशयौ)

एवं पूर्वपक्ष एवावस्थिते प्रसङ्गादूहितमन्त्रप्रयोगगतविशेषविचारः क्रियते । प्रातस्सवने तृतीयसवने च सवनमुखीयेषु सर्वेषु चमसेष्विन्द्रार्थं सकृद्धुतेषु ये तावद्धोतृब्रह्मोद्गातृयजमानानां वैकल्पिकसदस्ययुक्तानां मध्यतःकारिणां चमसास्तेष्वनुवषट्कारेऽपि हुतेषु पश्चाद्धोत्रकाणां मैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्रच्छावाकाग्नीध्राणां ये चमसास्तेषु द्रोणकलशात्सोमान्तरं सशेषेष्वेवाभ्युन्नीय तैर्मित्रावरुणादिदेवतान्तरेभ्यो हुत्वा भक्ष्यते । तत्र किं पूर्वहोमदेवताभूतेन्द्रपदमपि भक्षमन्त्रे कीर्तयितव्यं उत नेति विचार्यते । अत्र चाच्छावाकचमसेन प्रातस्सवने तदानीमहोमादनुदाहरणत्वं तृतीयसवने तूदाहरणमेव ।

(सङ्गतिः)

अत्र च भक्षमन्त्रस्य लिङ्गादिन्द्रदेवत्यपूर्वप्रदानाङ्गत्वस्यैव पूर्वाधिकरणपूर्वपक्षोक्तस्याक्षिप्य समाधानात्पादाध्यायानन्तरसङ्गतयः। आद्यपूर्वपक्षमात्रोपजीवित्वेऽपि वा अस्याधिकरणस्यैतदधिकरणापवादभूताग्रिमाधिकरणस्योहपक्षोपजीवित्वात्तदुत्तरमारम्भः।

(सिद्धान्तः)

तत्र पूर्वदेवताशेषस्य सत्यप्यभ्युन्नीयमानेन संसर्गेऽभ्युन्नीतस्यैवोत्तरदेवतासम्बन्धेन शेषस्य पूर्वदेवतासम्बन्धानपायादुभयोरपि भक्षणाख्यसंस्कारावश्यंभावे तन्मन्त्रे उत्तरप्रदानाङ्गभूताया देवताया ऊहेनोपलक्षणवत्पूर्वप्रदानाङ्गभूतस्यापीन्द्रस्योपलक्षणं लिङ्गेन न विरुध्यते ।

यद्यपि चोभयोरपि संसृष्टत्वान्नात्र भक्षणस्य तन्मन्त्रोच्चारणस्य वा पृथगनुष्ठानं तथापि तन्त्रेणैव भक्ष्यमाणे सोमे सूक्तवाकवदितरपदतन्त्रत्वेऽपि इन्द्रमित्रावरुणपीतस्येत्येवमुभयोरप्युपलक्षणत्वं न विरुध्यते । अत एव ब्राह्मणाच्छंसिचमसे पूर्वोत्तरप्रदानयोरिन्द्रमात्रदेवत्यत्वेऽपि सकृदुच्चारितेन्द्रपदेनैवोभयापूर्वीयत्वेन तदनुसन्धानं द्रष्टव्यम् ।

एवं माध्यन्दिनसवनस्य सवनमुखीयेष्वपि । तत्रापि सर्वचमसानां पूर्वोत्तरप्रदानयोरिन्द्रमात्रदेवत्वत्वात् । सूत्रं स्पष्टम् ॥

(इति सिद्धान्तः)

सू—अपनयाद्वा पूर्वस्यानुपलक्षणम् ॥३—२—३०॥ (पू)

(अथ पूर्वपक्षः)

होमकाले तावत्संसृष्टत्वादुभयोरप्याश्रावणप्रत्याश्रावणादिभिरुक्तदेवतासम्बन्धो ऽवसीयते ।

न च संसर्गेऽपि वायव्येन्द्रवायवसोमवद्ग्रहणकालीनाविवेकमात्रेण बुद्ध्या निष्कर्षोपपत्तिः। तत्र ग्रहणकाले देवतासंयोगसत्त्वेन बुद्ध्या निष्कर्षोपपत्तावप्युन्नयने देवताविधेर्बौधायनीयादिकल्पेष्वदर्शनेनाभ्युन्नीतमात्रस्योत्तरदेवतासम्बन्धकल्पने प्रमाणाभावाद्यागकालीनस्य च याज्यामन्त्रवर्णकल्प्यदेवतासम्बन्धस्य

म्बन्धो द्रव्ये कश्चिदभ्युपेयः । न ह्यसौ देवतोद्देशेनोपकल्पितत्वमात्रं, प्रतिपत्त्युत्तरं लौकिकव्यवहारेण तस्यासंभवात् । अतोऽवश्यं प्रतिपत्तिनाश्यः कश्चिद्देवतासम्बन्धोऽभ्युपेयः । तस्य च धर्मिग्राहकप्रमाणेन देवतान्तरसम्बन्धिविरोधित्वावगतेस्तदत्यन्ताभावसमानाधिकरणस्यास्य तत्सामानाधिकरण्यानुपपत्तेरवश्यं शेषस्योत्तरदेवतासम्बन्धे पूर्वदेवतासम्बन्धोऽपगच्छतीत्यभ्युपगन्तव्यम् ।

न चैवं पूर्वदेवतासम्बन्धापगमेऽपि तस्य भूतत्वमात्रेणोपलक्षणत्वोपपत्तिः। मध्यतःकारिचमससाध्येन्द्रप्रदाने विद्यमानस्यैव सम्बन्धस्योपलक्षणत्वेन होत्रकचमससाध्येन्द्रप्रदाने भूतपूर्वगत्या तदुपलक्षणत्वाङ्गीकारे वैरूप्यापत्तेः । अतो मित्रावरुणपीतस्येत्याद्येवोपलक्षणम् । सूत्रं स्पष्टम् ॥

(इति पूर्वपक्षः)

सू–(१)अग्रहणाद्वाऽनपायस्स्यात् ॥ ३–२–३१ ॥

(पुनस्सिद्धान्तः)

न शेषस्योत्तरदेवतासम्बन्धः , पूर्वदेवतासम्बन्धापनयो वा, उन्नीतमात्रस्यैवोत्तरदेवतासम्बन्धात् ।

यद्यपि च त्यागवेलायां संसृष्टत्वान्न विवेकप्रतीतिः, तथाप्युन्नयनवेलायां विवेकोपपत्तेः वायव्यैन्द्रवायवसोमवत्त्यागवेलायामपि तस्यैव त्यागोपपत्तिः ।

यद्यपि च नोन्नयनवेलायां प्रकृतौ विकृतौ वा देवतास-

(१) यद्यपीदं सूत्रं 'ग्रहणाद्वाऽपनयः स्या'दित्येव भाष्यशास्त्रदीपिकामुद्रितपुस्तकेषूपलभ्यते पठितं, तथापि सर्वेषु कौस्तुभादर्शेषु मदीये प्राचीनतमहस्तलिखितभाष्यपुस्तके कुतहलवृत्तौ च 'अग्रहणाद्वाऽनपायः स्या'दित्येवसूत्रानुपूर्वीदर्शनात् मुद्रितपुस्तकपाठस्वीकारे प्रकृतसिद्धान्तविरोधात् । मयापि स एव पाठस्स्वीकृतः ।

म्बन्धस्तथापि प्रकृतौ तात्रदुन्नयनस्य दृष्टार्थत्वाद्यागीयद्रव्य-संस्कारकत्वावगतेः विकृतावपि प्राकृतोन्नयनानुवादेन द्रोण-कलशापादानकत्वमात्रविधानेन प्राकृतकार्यापन्नतयोन्नयनान-न्तरविधानेन वा पुनरभ्युन्नीतस्यैव फलचमसहृदयादिवद्यागी-यत्वप्रतीतेः पूर्वशेषस्य च यागीयद्रव्याधारभूतपात्रोपलक्षण-तया 'पयसा मैत्रावरुणं श्रीणाती'तिवदभ्युन्नीतसंस्कारमात्र-त्वावगतेः उत्तरयागार्थत्वे प्रमाणाभावः ।

एवं परमसिद्धान्ते प्रकृतिविकाराभावेऽप्युन्नयनस्य दृष्टार्थ-त्वादेव यागीयद्रव्यसंस्कारार्थत्वावगतेः पूर्वशेषस्योत्तरयागा-र्थत्वे प्रमाणाभावो द्रष्टव्यः ।

वस्तुतस्तून्नयनेऽपि चाश्रावणकाले देवतासम्बन्ध इत्यादि भाष्यवार्तिकग्रन्थाद्देवतासम्बन्धविधिःकल्पान्तरेऽस्तीत्यभ्युपग-न्तव्यम् । अन्यथा अव्यक्तत्वनिर्वचनानुपपत्तेः ।

न चोत्पत्तिवाक्येऽविहितदेवताकेष्टिभिन्नयागत्वं तत्।उत्पत्ति-वाक्येऽविहितदेवताकज्योतिष्टोमभिन्नयागत्वेन विनिगमनाविर-हात् । अतः स्वाङ्गतयाऽविहितदेवताकत्वमेव तत् ।

न चास्यापि पूर्वोक्तेन विनिगमनाविरहः । 'ऐन्द्रवायवं गृह्णाती'त्यादौ ग्रहणसम्बन्धितयाऽग्रे देवताविधिवैयर्थ्यस्यैव नियामकत्वात् । अतश्चोन्नयनेऽपि देवतासम्बन्धसत्त्वादभ्युन्नी-तस्यैवोत्तरयागार्थत्वं न पूर्वशेषस्येति तस्य पूर्वदेवतासम्बन्धान-पायात्तत्प्रतिपत्तिरूपे भक्षणे कर्तव्ये उपलक्षणीय एवेन्द्रः । यदि ह्युन्नयनस्योन्नीतसंसर्गस्य वा पूर्वशेषप्रातिपत्त्यर्थता प्रयाजशेषा-भिघारणवद्भवेत् ततो विशेषप्रतिपत्त्या सामान्यप्रतिपत्तिरूपस्य भक्षणस्य बाधान्नोपलक्ष्येतापि । न तु तदस्ति । शेषस्य पात्रोपल-क्षणत्वेन श्रुतस्य प्राधान्यलक्षणायां प्रमाणाभावादभ्युन्नीतस्यो-

त्तरयागाङ्गत्वेन विधाने वाक्यभेदाच्च । अतो भक्षणरूपप्रतिपत्ते-रावश्यकत्वादुपलक्षणीय एवेन्द्र इति सिद्धम् ।

प्रयोजनस्य पक्षोक्तत्वेऽप्यूहस्यैन्द्रप्रदानमात्रसम्बन्धित्वस्य वा स्थायित्वाभावादेतद्विचारहेतुभूतस्य पूर्वशेषद्रव्यस्युत्तरयागा-ङ्गत्वसदसद्भावरूपस्य विचारस्य स्थायिनः स्थायिभूतं प्रयो-जनमुत्तरयागकालेऽभ्युन्नीतस्यैव देवतासम्बन्धानुसन्धानमित्ये-वंविधं द्रष्टव्यम् ॥ सूत्रं स्पष्टम् ॥

इत्यनन्तरागर्भिण्यां प्रथमं पुनरभ्युन्नीताधिकरणम् ॥

(पुनरभ्युन्नीतपूर्वदेवतोपलक्षणाधिकरणम्) (१२)

अथ द्वितीयं पात्नीवते द्विदैवत्यदेवतो-पलक्षणाधिकरणम् ॥ (१३)

सू—पात्नीवते तु पूर्ववत् ॥ ३–३–३२ ॥

(विषयसंशयौ)

द्विदेवत्यशेषार्धमादित्यस्थालीस्थसोमे प्रातस्सवने सम-वनीय तृतीयसवने संसृष्टादित्यस्थालीस्थसोमेन सह पूर्वगृहीता-ग्रयणस्थालीस्थस्सोमः पात्रान्तरे कृत्वा पुनराग्रयणस्थाल्यां गृह्यते । पश्चाच्चो‘पांशुपात्रेण पात्नीवतमाग्रयणाद्गृह्णाती’ति श्रुतम् । तस्मिन्पात्नीवते तच्छेषे भक्ष्यमाणे किं मन्त्रे तद्देवताग्निः पत्नीवानूहेनोपलक्षणीयः ? उत द्विदेवत्यशेषार्धस्यापि संसृष्टत्वात्त-देवता अपि वाय्विन्द्रवायुमित्रावरुणाश्विनोऽपीति विचार्यते ।

(सङ्गतिः)

पूर्वाधिकरणव्युत्पादितस्य पूर्वदेवतासम्बन्धापनयस्यापवा-दादनन्तरसङ्गतिः । अपादानभूताग्रयणापेतरूपाद्वस्तुसामर्थ्या-दनाग्रयणरूपस्यापि पूर्वशेषस्य पात्नीवतयागाङ्गत्वाभिधानाच्च

पादाध्यायसङ्गतिः ।

अत्र च यद्यपीदं सङ्गतित्रयमूहविषयविचारहेतुभूतपूर्वशेषापनयनविचार एव सम्भवतीति नोहविशेषविचारस्येह कश्चिदुपयोगः, तथापि इन्द्रपीताधिकरणमध्ये चिन्तनात्तेनापि सङ्गतिलाभार्थं तदीयद्वितीयपूर्वपक्षोपजीवनेन तत्करणं नातीवासङ्गतम् ।

(पूर्वपक्षः)

तत्र गृह्णातीत्यस्य कर्माकाङ्क्षाया आवश्यकत्वात् स्ववाक्ये कर्मकारकान्तराश्रुतेराग्रयणाख्यसोमस्यैव कर्मत्वेनान्वयात्तस्यैव पत्नीवद्देवतासम्बन्धेन पात्नीवतयागाङ्गत्वप्रतीतेस्तत्संसृष्टस्यापि पूर्वशेषस्योत्तरदेवतासम्बन्धाभावात्पूर्ववत्पूर्वदेवतासम्बन्धापनयानुपपत्तेस्तस्यापि प्रतिपत्त्यर्थं भक्षणावश्यंभावे चमसवद्ग्रहाभ्यासानामप्यैन्द्रयागाभ्यासप्रकृतितयाऽतिदेशप्राप्ते मन्त्रे ऊहेन सर्वदेवतोपलक्षणम् ।

न चाग्रयणादित्यपादानविभक्तिश्रवणाद्द्वितीयाषष्ठ्योरभावेन तस्य कर्मत्वानुपपत्तेरपादानापेतस्य चाग्रयणानाग्रयणसाधारणस्य संसृष्टस्य सोमरसस्य ग्रहणकर्मत्वेनान्वयोपपत्तेः पूर्वशेषस्याप्युत्तरदेवतासम्बन्धोपपत्तिरिति वाच्यम् । अपेतद्रव्यस्याशाब्दत्वेन ग्रहणकर्मत्वेनान्वयानुपपत्तेः । अतश्च तद्वाचकपदाध्याहारापेक्षया पञ्चम्या एव कर्मत्वलक्षणाया न्याय्यत्वाद्युक्तमाग्रयणस्यैव कर्मत्वम् । अस्तु वाऽऽग्रयणापेतस्यैव कर्मत्वं, तथाप्याग्रयणशेषस्यैव तदपेतत्वं न त्वनाग्रयणशेषस्य । तस्य पूर्वशेषादपेतत्वात् । अतस्तस्योत्तरदेवतासम्बन्धाभावेन पूर्वदेवतासम्बन्धानपायात्पूर्ववत्सर्वोपलक्षणमिति सूत्रार्थः ॥

(इति पूर्वपक्षः)

सू-ग्रहणाद्वाऽपनीतं स्यात् ॥ ३-२-२३॥ (सि)

(अथ सिद्धान्तः)

नाग्रयणस्यैव पत्नीवद्देवतासम्बन्धः, तस्यापादानमात्रतया श्रवणेन ग्रहणकर्मत्वाभावात् ।

न च प्रयाजशेषवल्लक्षणा । अपादानत्वेऽप्यदृष्टार्थत्वाभावात् ।

न च कर्माकाङ्क्षावशात्सा । अपादानसामर्थ्येनोपस्थितस्यापेतस्यैव कर्मत्वेनान्वयोपपत्तेः ।

न च तस्याशाब्दत्वम्, उक्तविधयोपस्थितस्य पात्नीवतमिति तद्धितेन परामर्शसंभवात् । यत्त्वाग्रयणावयवस्यैव तदपेतत्वं न त्वनाग्रयणावयवस्येत्युक्तम् । तत् 'वृक्षात् पर्णं पतती'त्यादौ कङ्ककुररादिपत्रस्यापि वृक्षपत्रवद्वृक्षापादानकत्वप्रतीतेः प्रकृतेऽप्याग्रयणावयववदनाग्रयणावयवस्याग्रयणापेतत्वोपपत्तेरयुक्तम् ।

न चैवं संसृष्टस्य सोमरसस्याग्रयणापादानकत्ववदनाग्रयणापादानकत्वस्यापि सत्त्वादाग्रयणापादानकत्वरूपस्य विशेषणस्यान्ययोगव्यावर्तकत्वाभावेन विशेषणत्वानुपपत्तिः। स्वसंसृष्टानाग्रयणयोगव्यावर्तकत्वाभावेऽप्ययोगव्यावर्तकत्वेनासंसृष्टान्ययोगव्यावर्तकत्वेन वा विशेषणत्वोपपत्तेः ।

अतश्च नाग्रयणस्यापि पूर्वशेषस्य पत्नीवद्देवतासम्बन्धात्तस्य च पूर्वदेवतासम्बन्धापनयं विना पूर्वाधिकरणपूर्वपक्षन्यायेनानुपपत्तेः अपनीतदेवतासम्बन्धरूपसोमभक्षणेनापनीतसम्बन्धदेवतोपलक्षयितव्या ।

ननु सम्बन्धापनयेऽपि भूतपूर्वगत्योपलक्षणं पूर्वदेवताया युक्तमेव। न च प्रकृतौ तथाऽनुपलक्षणादप्राकृतकार्यापत्तिः। इन्द्रपीतस्येति क्तप्रत्ययेन भूतकालवाचिना भूतस्यैवोपलक्षणीयत्वा-

वगतेः । प्रकृतौ च भूतसम्बन्धाभावेनादिकर्मणि क्तप्रत्ययमङ्गीकृत्य यस्येन्द्रसम्बन्धोत्पत्तिक्षणो वृत्तः तस्येत्यर्थावगमात् प्रकृतौ सम्बन्धसत्त्वकाल इव विकृतौ तन्नाशकालेऽप्युत्पत्तिक्षणवृत्तित्वस्याविशेषादुपलक्षणोपपत्तिरिति चेत्-

न ; पीतशब्दस्यात्र स्वीकाराख्यसम्बन्धवाचित्वात्तस्य च लोके नाशदशायां स्वीकृत इत्येवं प्रयोगाभावेन विद्यमानस्यैव प्रत्ययेन कथञ्चिद्वाच्यत्वेनावधारणात्प्रतीतिवशेन विद्यमानफलसमानकालीनव्यापारातीतत्वस्यैव क्तप्रत्ययेन सर्वत्राभिधानाच्च विद्यमानस्यैव सम्बन्धाख्यफलस्य प्रकृतावुपलक्षणेन विकृतौ तदभावादप्राकृतकार्यकारितापातेन विकृतावुपलक्षणानुपपत्तेः । तस्मात्पत्नीवद्देवतैवोपलक्षणीया । स्थायिविचारप्रयोजनं त्यागकाले आग्रयणस्यैवानुसन्धानाभावः । सूत्रं स्पष्टम् ॥

इत्यन्तरागर्भिण्यां द्वितीयं पात्नीवताधिकरणम् (१३)

अथ तृतीयं पात्नीवते त्वष्टुरदेवतात्वाधिकरणम् (१४)

सू—त्वष्टारं तूपलक्षयेत्पानात् ॥ ३—२—३४ ॥

(विषयसंशयसङ्गतयः)

तस्मिन्नेव पात्नीवतयागाङ्गभूते भक्षमन्त्रे किं त्वष्टुरप्यूहेनोपलक्षणम् ? उत नेति विचार्यते । (१)"अग्ना३इ पत्नीवा३स्सजूर्देवेन त्वष्ट्रा सोमं पिब" इत्याध्वर्यवमन्त्रलिङ्गात्त्वष्टुरपि पात्नीवतयागाङ्गत्वमस्ति न वेति स्थायिविचारस्य पादाध्यायसङ्गतिस्स्पष्टा । पात्नीवतयागे पूर्वं द्रव्यविचारे कृतेऽधुना देवताविचारात्प्रासङ्गिकी । ऊहविचारसङ्गतिस्तु पूर्ववदेव ।

१. तै. सं. १-४-२७,

(पूर्वपक्षः)

तत्र यद्यपि तावद्विधौ पत्नीवन्मात्रस्य तद्धितेन देवतात्वमुक्तम्, तथापि पत्नीवच्छब्दस्य यौगिकस्य नित्यं विशेष्यसाकाङ्क्षत्वादवश्यं प्रमाणान्तरेण विशेष्यं पूरणीयम् । न च शब्दस्य देवतात्वात्पूरणवैयर्थ्यम्, तथात्वेऽपि प्रातिपदिकत्वसिद्ध्यर्थं तदपेक्षणात् ।

ननु त्यागकालीनोच्चारणविषयत्वरूपदेवतात्वस्य तद्धितार्थत्वात्तदनुरोधेनार्थपरस्यापि प्रातिपदिकस्य लक्षणया शब्दपरत्वमङ्गीकृत्य शब्दस्य देवतात्वमिष्टम् । अतश्च त्यागकालेऽर्थानुसन्धानं विनापि पत्नीवच्छब्दमात्रप्रयोगेण शास्त्रार्थोपपत्तेः यत्र चतुर्थ्यपि न प्रयोक्तव्या तत्र विशेष्यवाचकपदप्रयोगस्य क्वोपयोगः ? परं प्रथमैव साधुत्वार्थमुच्चारणीयेति चेत्—

न ; अर्थप्रत्ययानुकूलचतुर्थ्यन्तपदोच्चारणरूपस्यैवोद्देशस्य वृद्धव्यवहाराद्यागघटकत्वावगमेन चतुर्थ्यन्तपदोच्चारणवच्छब्दस्यार्थप्रत्ययस्याप्यावश्यकत्वेन तत्र विशेष्यापेक्षायां तद्वाचकचतुर्थ्यन्तशब्दोच्चारणस्यावश्यकत्वात् । अत एव त्यागस्य मानसत्वेऽप्युक्तविधोद्देशस्य निराकाङ्क्षत्वसिद्ध्यर्थं तद्वाचकपदप्रयोगोऽपि याज्ञिकानां सङ्गच्छते । तस्मात्सिद्धं विशेष्यसाकाङ्क्षयौगिकपदस्थले तत्समर्पणं प्रमाणान्तरेणेति ।

तदिह यथैवाग्निरूपस्य विशेष्यस्य मन्त्रवर्णेन समर्पणं तथैव त्वष्टुरपि । तस्यापि मन्त्रवर्णेन देवतात्वाभिधानात् । तथाहि—

यद्यपि तावदग्नेरिव शब्दतः पानपदलक्ष्यस्वीकारः प्रतीयते पत्नीवच्छब्दसामानाधिकरण्यं च तथापि त्वष्टुस्सहत्ववाचिसजूश्शब्देन साहित्यावगमात्तस्य चैकक्रियान्वयानिमित्तकत्वात्त्वष्टुरप्यर्थाद्विशिष्टविधौ विशेषणविधिवत्स्वीकाराख्यपानसम्ब-

न्धावगतेस्तस्य च तदुद्देशेन यागं विनानुपपत्तेर्देवतात्वसिद्धिः ।

अत एव तद्बलेन पत्नीवत्तायामपि तस्य साहित्यम् । एवं च देवशब्दोऽपि देवतात्वपरस्सङ्गच्छते । अतश्च मन्त्रे त्वष्टुरपि स्वीकारान्वयित्वेनाग्निवद्विधौ पत्नीवच्छब्दविशेष्यत्व-प्रतीतेस्तस्यापि देवतात्वम् । तत्राप्यग्नित्वष्ट्रोर्न व्यासक्ता विशेष्यता । मन्त्रे भिन्नपदोपादानेन प्रत्येकमेव तत्प्रतीतेः । अपि तु प्रत्येकमेव समुच्चयेन । अतश्च 'पत्नीवते ऽग्नये त्वष्ट्र इदं न मम'-ति त्यागसिद्धिः । अथ वा मन्त्रे त्वष्टृसाहित्यविशिष्टस्याग्नेरुपादानाद्विधावपि तादृशस्यैव विशेष्यता । तेन पत्नीवते त्वष्टृ-सहितायाग्नय इति त्यागः । तेन त्वष्टुरप्युपलक्षणम् । सूत्रं स्पष्टम् ॥

(इति पूर्वपक्षः)

सू–अतुल्यत्वात्तु नैवं स्यात् ॥ ३–२–२५(सि)

(अथ सिद्धान्तः)

नाग्निना तुल्यस्त्वष्टा । शाब्देनपाया तु लक्षितस्वीकारान्वयेन शीघ्रप्रतीतिविशेष्यत्वेनाग्निना सहभावश्रुत्यन्यथानुपपत्तिकल्पित-स्वीकारसम्बन्धबललभ्यविशेष्यत्वस्य त्वष्टुस्साम्यानुपपत्तेः । न चान्यथानुपपत्तिरपि,

'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ।'

इत्यादौ क्रियान्वयाभावेऽपि विद्यमानत्वमात्रेण सहभाव-दर्शनात् । अतश्च त्वष्टुस्स्वीकारसम्बन्धाभावेऽप्यग्निस्तुत्यर्थं विद्यमानत्वोपचारेण सहभावसङ्कीर्तनोपपत्तेः न मन्त्रादपि सहभावप्रतीतिरेकान्तिकी । देवशब्दोऽपि न देवताशब्दादिव देवतात्वमाह । मनुष्यत्वादिवदिन्द्रादिद्याचिजातिवाचित्वात् ।

देवतात्ववाचित्वेऽपि वा यागान्तरगतस्यैव देवतात्वस्याग्निस्तुत्यर्थं सङ्कीर्तनोपपत्तेश्च । तस्मान्न त्वष्टोपलक्षणीयः । स्थायिविचारप्रयोजनं सूत्रं च स्पष्टम् ॥

इत्यन्तरागाभिंग्यां तृतीयं त्वष्ट्रधिकरणम् ॥ (१४)

अथ चतुर्थं त्रिंशदधिकरणम् ॥ (१५)

सू–त्रिंशच्च परार्थत्वात् ॥ ३–२–३६ ॥

(विषयसंशयसङ्गतयः)

तद्यागाङ्गभूतभक्षमन्त्र एव किं त्रयस्त्रिंशद्देवतोपलक्षयितव्या ? नेति विचारः। अत्रापि "एभिरग्ने सरथं याह्यर्वाङ्नाना रथं वो विभवो ह्यश्वाः। पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमावह मादयस्वे"ति याज्यामन्त्रवर्णात्तेषां पात्नीवतयागे देवतात्वमस्ति न वेति स्थायिविचारस्य पादाध्यायसङ्गतिः पूर्ववत् । आतिदेशिकी त्वनन्तरा ।

(पूर्वपक्षः)

अधिकाशङ्का तु पूर्वं त्वष्टुः पत्नीवच्छब्दसामानाधिकरण्याभावात् प्रत्युत(१) "सहयुक्ते ऽप्रधाने" इत्यनुशासनेन गुणत्वस्यैवावगतेः नाग्नितुल्यत्वमित्युक्तम् । प्रकृते तु यथैवाध्वर्यवमन्त्रे अग्नेः पत्नीवच्छन्दसामानाधिकरण्यं तथाऽग्नीत्प्रयोज्ये याज्यामन्त्रे त्रयस्त्रिंशद्देवानामपीत्यविशेषादुभयोरपि विशेष्यत्वम् ।

न चैवं पात्नीवतमिति विधावग्न्यंशे एकवचनान्तेन विग्रहः त्रयस्त्रिंशदंशे च बहुवचनान्तेनेत्येवं वैरूप्यापत्तिः । उभयांशेऽविशेषेण बहुवचनान्तेनैव विग्रहोपपत्तेः । अत एव तत्तन्मन्त्रे

---

१. पा. सू. २–३–१९.

उभयोरपि नैरपेक्ष्येण पत्नीवत्पदसामानाधिकरण्यावगमान्नैरपेक्ष्येणैव विशेष्यत्वावगमेऽपि विधावुभयोस्तात्पर्यग्राहकमहकृतेन पत्नीवच्छब्देन युगपदभिधानादुपादेयसाहित्यस्य विवक्षितत्वादुभयोस्समुच्चयोपपत्तिः ।

वस्तुतस्तु याज्यामन्त्रेऽग्नेः पत्नीवत्पदसामानाधिकरण्याभावेऽपि विशेष्यमात्रस्याग्नेश्श्रवणादेकवाक्योपादानेन त्रयास्त्रिंशद्देवैस्समुच्चयोपपत्तिः ।

अस्तु वा याज्यामन्त्रे उत्तरार्धे हे अग्ने पत्नीवतो देवान्स्वधां सोमाख्यमन्नमनु लक्षीकृत्याऽऽवह मादयस्व चेत्येवमर्थके त्रयस्त्रिंशद्देवानामेव सोमसम्बन्धावगमादग्नेश्च तदावाहनकरणार्थमेव पूर्वार्धे हे अग्ने त्वमेभिस्त्रयस्त्रिंशद्देवैस्सह सरथं समानं रथमधिरुह्य नानारथैर्वा आयाहि, यतस्तेऽश्वा विभवन्तीत्यर्थके आवाहनात् अग्नेर्हविस्सम्बन्धाभावावगमेनाध्वर्यवमन्त्रे च तस्य हविस्सम्बन्धावगमेनाग्नेः पाक्षिकं विशेष्यत्वम् । नत्वेतावता त्रयस्त्रिंशद्देवानां विशेष्यत्वे किञ्चिद्बाधकमस्ति । तेषां याज्यामन्त्रे नित्यमेव हविस्सम्बन्धावगमादिति ।

(सिद्धान्तः)

सा त्वेवं परिहर्तव्या—न त्रयस्त्रिंशद्देवा उपलक्षणीयाः । तेषां याज्यामन्त्रेऽपि त्यागोद्देश्यत्वानवगमेन पत्नीवत्पदविशेष्यत्वायोगात् ।

यद्यपि हि तेषामग्निदत्तेन सोमेन मदश्श्रूयते तथापि यजमानेन तावदग्नय एव दत्त इति गम्यते । अन्यथा अग्निकर्तृकमादनश्रवणानुपपत्तेः । अतश्च यद्यपि तेषां मादनं मुख्यं स्यात्तथापि न यजमानकर्तृकत्यागोद्देश्यत्वावगमः । अग्नेरेव त्वाध्वर्यवमन्त्रवर्णाद्याज्यामन्त्रेऽपि साक्षादग्नीधा आवहनात्तत ।

वस्तुतस्तु मादनस्याप्यग्निकर्तृकस्याग्निगतस्वामित्वख्यापनार्थमेवोपादानमित्याध्वर्यवमन्त्रवर्णानुसारेण कल्प्यमानत्वादग्नेरेव देवतात्वमविरुद्धम् । तेन न त्रयस्त्रिंशद्देवा उपलक्षणीयाः । स्थायिविचारप्रयोजनं सूत्रं च स्पष्टम् ॥

इत्यनन्तरागभिण्यां चतुर्थं त्रिंशदधिकरणम् ॥(१५)

अथ पञ्चममनुवषट्कारदेवतानुपलक्षणाधिकरणम् (१६)

सू—वषट्कारश्च कर्तृवत् ॥ ३-२-३८ ॥(पू)

(विषयसंशयसङ्गतयः)

अनुवषट्कारदेवताभूतोऽग्निर्भक्षमन्त्रे उपलक्षणीयो नवेति विचार्यते । अत्रातिदेशिकी अनन्तरसङ्गतिः ।

(पूर्वपक्षः)

तत्रानुवषट्कारयागस्तावन्न ज्योतिष्टोमयागाभ्यासः। अपि तु कर्मान्तरमिख्रविवादम् । 'अग्नये ऽनु यजती'ति तन्त्रसारधृते विधौ प्राप्तयागानुवादेनाग्निदेवताया वषट्कारयागोत्तरत्वस्य चानुशब्दोक्तस्य विधाने वाक्यभेदापत्तेः विशिष्टकर्मविध्यवश्यंभावात् तस्य च "सोमस्याग्ने विहीत्यनुयजती"त्यनेन मन्त्रविधिना मान्त्रवर्णिके सोमाख्यद्रव्ये समर्पिते धर्मान्तराकाङ्क्षायां प्रकरणात् ज्योतिष्टोमाङ्गभूतेऽप्यस्मिन्यागे वैमृधवत्सोमद्रव्यकत्वसादृश्यात्तदीयविध्यन्तप्राप्तेरतिदेशेन यागीयसोमभक्षणे तन्मन्त्रे च प्राप्ते युक्तमेवानैन्द्रप्रदानोत्तरवत्तदीयदेवताभूताग्न्युपलक्षणम् । तत्रापि "द्विरैन्द्रवायवस्य भक्षयति । द्विर्ह्येतस्य वषट्करोती"त्यादौ यागभेदेन भक्षणावृत्तिदर्शनादनुवषट्काराङ्गभक्षणस्य पृथगेवानुष्ठानम् । तत्र च तद्देवतोपलक्षणम् ।

अथ वैन्द्रवायवादौ भक्षणावृत्तेर्वाचनिकत्वस्य वक्ष्यमाणत्वादन्यत्र वषट्कारानुवषट्कारयागाङ्गभूतयोस्सोमभक्षयोस्तन्त्रेणानुष्ठानात्तत्रैव देवताद्वयोपलक्षणम् ।

नन्वेतस्यानुवषट्कारयागस्य कर्मान्तरत्वेऽपि पृथक्सोमग्रहणविध्यभावात्कथञ्चिदतिदेशेन तत्प्राप्तिसम्भवेऽपि वा "यद्धविर्वहति तेन शेषेण संयोजयति देवता"मित्यर्थवादेन वषट्कारदेवतायै यद्धविर्वहति तच्छेषेणानुवषट्कारदेवतां संयोजयतीत्यर्थकेन वषट्कारयागीयसोमशेषद्रव्यकत्वप्रतीतेस्तदा चोत्तरार्धादिवत्प्रतिपत्तिलक्षणसत्त्वेनानुवषट्कारयागस्य प्रतिपत्तिकर्मत्वावसायात् ।

यद्वा "सोमस्याग्ने वीहीत्यनुवषट्करोति । तेनैव संस्थितान्सोमान्भक्षयन्ति । स एव सोमस्य स्विष्टकृ"दिति द्रव्यप्रतिपत्त्यर्थस्विष्टकृद्यागरूपत्वसंस्तवादपि च तन्निश्चयावगतेस्सङ्कर्षे च स्विष्टकृद्वत्तन्त्रानुष्ठानमनुवषट्कारयागस्य पूर्वपक्षयित्वा वषट्कारयागानन्तर्यरूपक्रमपृथक्त्वाद्विदेवत्येष्वनुवषट्कारनिषेधरूपालिङ्गाच्च वक्ष्यमाणाया आवृत्तेरर्थकर्मत्वे तन्त्रानुष्ठानप्रसङ्गेनानुपपत्तेः प्रतिपत्तिकर्मत्वद्योतकत्वात् प्रतिपत्तिकर्मत्वं तावदविवादम् ।

न च 'तेनैव संस्थितान् सोमान् भक्षयन्ती'त्यत्र सोमस्य भक्षणार्थमवशेषितस्य स्वरूपेण समाप्तिरूपसंस्थानुपपत्तेर्भक्षणस्यापि सोमजन्यत्वेन जन्याभिप्रायेण संस्थावादानुपपत्तेः कार्याभिप्रायेण तद्व्याख्यानस्यावश्यकत्वादनुवषट्कारस्यार्थकर्मत्वाभावे च तेन कार्यसमाप्त्यभिधानानुपपत्तेस्संस्थालिङ्गात्तस्यार्थकर्मत्वमिति केषांचिदुक्तं युक्तम् । अनुवषट्कारस्याश्रयिकर्मत्वेन त्यागांशरूपकार्याभिप्रायेण तदुपपत्तेः ।

अतोऽस्य प्रतिपत्तिकर्मत्वात्तस्यार्थकर्मभूतसोमयागविकृति-

त्वानुपपत्तेः कथमप्राप्त एव भक्षे तन्मन्त्रे च देवतोपलक्षणमिति चेत्—

तत्र प्रतिपत्तिकर्मत्वेऽपि निष्कासावभृथवाजिनयागन्यायेनेतिकर्तव्यताकाङ्क्षायां सोमजन्ययागत्वसादृश्येनातिदेशोपपत्तेः । यथा च वाजिनादियागस्य प्रतिपत्तिकर्मत्वं तथा तत्र तत्र निरूपयिष्यामः । अतो युक्तमुपलक्षणमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—सत्यमनुवषट्कारयागः कर्मान्तरम्, वषट्कारयागाङ्गं प्रतिपत्तिकर्म च, तथापि तस्यानैन्द्रप्रदानेषु तावदतिदेशेनैव प्राप्तत्वात्प्रकृतावेवानुपलक्षणेन नोपलक्षणाशङ्का ।

न च प्रकृतावेवानुवषट्कारयागस्यातिदेशप्राप्ते भक्षमन्त्रे देवतोपलक्षणसम्भवः । प्रकृतावैन्द्रयागे होत्रकचमसेष्वनुवषट्कारस्यैवाभावात् । मध्यतः कारिचमसेषु तत्सत्वेऽपि वा तस्य प्रयाजादिवत्कृत्स्नविधानत्वेनेतिकर्तव्यतानपेक्षणादतिदेशानुपपत्तेर्भक्षस्य तन्मन्त्रस्य वाऽप्राप्तावूहेन देवतोपक्षलणस्याप्रसक्तेः । यदि तु कथञ्चित् "सोमं भक्षयती"त्यनेन वेदिबर्हिर्न्यायेनाङ्गप्रधानसाधारणसोमोद्देशेन भक्षणविधिमङ्गीकृत्यानुवषट्कारयागाङ्गभूतस्यापि सोमस्य भक्षणमुपदेशत एव प्राप्तमित्युच्यते तथापि तन्मन्त्रस्य "व्रीहीणां मेध" इति वद्सामर्थ्येन तत्राविनियोगादूहप्रसक्तिर्दूरतरैव । अत एवेन्द्रपीताधिकरणसिद्धान्तरीत्या तद्विनियोगस्तु नैवानिष्टः । अत एवेन्द्रपीताधिकरणप्रयोजनस्यानुवषट्कारयागोऽपि विषय इत्येवं कथनार्थत्वादस्याधिकरणस्य पादाध्यायसङ्गतिः । स्थायिविचारप्रयोजनं साधारणाङ्गव्यतिरिक्तप्रधानमात्राङ्गानामनुवषट्कारयागाङ्गत्वासिद्धिः ।

सूत्रं त्वनुवषट्कारदेवतापि नोपलक्षणीया । तस्यास्त्वया-

गाङ्गभूतद्रव्यमात्रत्वसत्त्वे ऽप्यतिदेशाभावेन प्रकृतकार्यापत्त्यभावात्कर्तृवत् । यथाध्वर्युणा पाने क्रियमाणे पूर्वं होत्रा पीतोऽपि न होतृपीतस्येत्येवमुपलक्ष्यते तद्वदिति व्याख्येयम् ॥

इत्यनन्तरागामिण्यां पञ्चममनुवषट्कारदेवतानुपलक्षणाधिकरणम् ॥ (१६)

अथानैन्द्राणाममन्त्रकभक्षणाधिकरणम् (१७)

सू—छन्दःप्रतिषेधस्तु सर्वगामित्वात् ॥३-२-३८॥

इन्द्रपीताधिकरणाऽऽद्यपूर्वपक्षवादी ऊहपक्षं दूषयति—नानैन्द्रेषूहः । यागैकत्वेन प्रकृतिविकारभावासम्भवात् ।

न चाभ्यासानामेव सोमफलचमसाभ्यासानामिव कथञ्चित्फलवत्त्वेनाङ्गग्राहित्वोपपत्तेः प्रकृतिविकारभावोपपत्तिः । तद्वदिह नित्यानित्यसंयोगविरोधादेस्समानविध्यभावहेतोरभावेन प्रकरणात्सर्वाभ्यासानां समानविधानत्वोपपत्तेः ।

न चेहापि मानग्रहणमन्त्रयोरिन्द्रप्रदानमात्रविषयत्वात्तदनुरोधेन च मानग्रहणयोस्तत्संस्कार्यस्य सोमस्य तत्संस्काराणां चाभिषवादीनां तत्संवलितानां च दीक्षणीयादीनामप्यैन्द्रप्रदानमात्रविषत्वावगतेस्समानविध्यभावोपपत्तिरिति वाच्यम् । अङ्गानुरोधेन प्रधानानां स्वस्वोद्देश्यसङ्कोचकत्वानुपपत्तेः ।

न चाग्निविध्यनुरोधेन क्रतुविध्यधिकारसङ्कोचवत्तदुपपत्तिः। यथाविनियोगमधिकारस्य षष्ठे वक्ष्यमाणत्वादङ्गानुरोधेनाधिकारिसङ्कोचेऽपि तदितरश्रुतस्वोद्देश्यसङ्कोचानुपपत्तेः ।

किञ्चाग्निविद्ययोराधानाध्ययनविध्यनुनिष्पन्नयोः क्रतुविध्यप्रयुक्तत्वेन स्वतास्सिद्धयोरेवोपजीवनात् परप्रयुक्तोपजीविनां

च तदभावे स्वानुष्ठानाभावस्य प्रयुक्तिशक्तिकल्पनाभावेन नि-धिलाघवापादकस्य परप्रयुक्तपूर्वपदार्थानन्तर्याभावे काम्य-सामिधेन्यनुष्ठानाभावस्येव सुप्रसिद्धत्वाद्युक्तमग्निविद्ययोः क्रतुविध्यधिकारिसङ्कोचकत्वम् । प्रकृते तु मानग्रहणमन्त्रयोस्तदुद्देश्यानां च परप्रयुक्तत्वाभावेन क्रतुविधिप्रयुक्तत्वकल्पनावश्यम्भावात्सर्वाभ्यासानां च प्रकरणाविशेषेणाङ्गविनियोगप्रयोगविधिकल्पकत्वोपपत्तेर्न सङ्कोचे किञ्चिन्नियामकमस्ति । अत एव मानग्रहणमन्त्रयोर्लिङ्गाद् 'व्रीहीणां मेध' इतिवदैन्द्रप्रदानमात्रविषयत्वेऽपि मानादीनां पुरोडाशप्रतिष्ठापनस्येव सर्वविषयत्वात्तदीयमानग्रहणयोर्न समन्त्रकत्वम् ।

यद्यपि च मानादीनां सर्वाभ्यासीयसोमे सकृदेवानुष्ठानान्न तावता कश्चिदनुष्ठानोपयोगः, तथाप्यैन्द्रप्रदानोत्तरं सर्वसोमनाशे प्रदानान्तरार्थे सोमान्तरे मीयमाने गृह्यमाणे वाऽमन्त्रकत्वासिद्धिः ।

वस्तुतस्तु विधिवाक्ये वसुमत्त्वगुणस्याश्रवणा 'दिन्द्राय वसुमते' इति मन्त्रे तत्प्रतिपादनस्य व्यर्थत्वापत्तेः वसुमत्पदमिन्द्रातिरिक्तप्रकृतदेवतापात्रपरम् । अतश्च मन्त्रावपि सर्वप्रदानविषयावेव ।

यत्तु मूले सुब्रह्मण्यानिगदस्थेन्द्रपदस्येव प्रकृतदेवतोपापलक्षणार्थत्वमिन्द्रपदस्येत्येवं पक्षान्तरमुपन्यस्तम् , तत् सदृष्टान्तं लक्षणायां प्रमाणाभावादुपेक्षितम् । सुब्रह्मण्यानिगदोऽपि हि लिङ्गादिन्द्रप्रदानाङ्गमेव । अग्निष्टुत्या 'ग्नेयी सुब्रह्मण्ये' ति तु प्राकृतस्यैन्द्राभ्यासस्य "आग्नेया ग्रहा भवन्ती" ति वचनेनाग्निदेवत्यत्वान्न्यायेनैवोहप्राप्तेरनुवादः। प्रकारान्तरं च नवमे वक्ष्यते । तत्सिद्धं नेन्द्रप्रदानमात्रविषयत्वं धर्माणामिति ;

एवं च 'सोमेन यजेते'त्यादौ न सामानाधिकरण्येन वैशिष्ट्यम्। अपि त्ववच्छेदकावच्छेदेनैवेत्यपि सुलभम्। सोमपदानुवादशङ्का तु सक्तुविनियोगविधिकल्पनाव्यावृत्तिफलकतयापि विध्युपपत्तावनुवादत्वे वैयर्थ्यापत्तेः पशुसोमाधिकरण एव निरस्ता। अतः प्रकृतिविकृतिभावाभावान्नोहासिद्धिः।

यत्तु "अनुष्टुप्छन्दस इति भक्षमन्त्रं नमती"त्यनुवादलिङ्गं तदप्राप्तस्यैवानुष्टुप्छन्दःपदविशिष्टस्योहस्य विधानोपपत्तेरसाधकम्। तत्रापि हि जगतीच्छन्दःपदे ऊहस्याप्राप्तत्वाद्विशिष्टविधिरावश्यक एव। सामान्यतो यत्र कुत्रचिदूहप्राप्तिस्तु न विधिलाघवापादिकेत्यतन्त्रा सा।

सूत्रं तु नोहः, धर्माणां सर्वाभ्यासगामित्वेन प्रकृतिविकारभावासम्भवात्। यस्तु पूर्वछन्दःप्रतिषेधेन छन्दोऽन्तरविधिक्रमोऽप्युपपन्न इति व्याख्येयम्॥

इति अनैन्द्राणाममन्त्रकभक्षणाधिकरणम्॥ (१७)

अथ द्वितीयान्तरागाञ्चिण्याश्चैन्द्राग्नभक्षणे मन्त्राभावाधिकरणम्। (१८)

सू—ऐन्द्राग्ने तु लिङ्गभवात् स्यात ॥३—२—३९॥

(विषयसंशयसङ्गतयः)

इहाद्यपूर्वपक्षवाद्युक्तस्यैवानैन्द्रेष्वमन्त्रकत्वस्य कोष्ठशोधनिकार्थं विचार्यते। किं यत्रान्यसहित इन्द्रो देवता, यथैन्द्राग्न्यादौ तत्र इन्द्रपीतस्येति मन्त्रो भवत्युत नेति। पादाध्यायानन्तरसङ्गतयस्स्पष्टाः।

(पूर्वपक्षः)

तत्र यद्यपि चतुर्थीकरणाधिकरणन्यायेनैन्द्राग्न्योर्व्यास-ज्यवृत्तिदेवतात्वान्नेन्द्रपीतपदेनेन्द्राय त्यक्त इति व्युत्पत्त्ये-न्द्रो देवतात्वेन शक्यो व्यपदेष्टुं तथापि पीतशब्दस्य त्यक्त-त्वलक्षणायां प्रमाणाभावाच्चतुर्थीसमासस्याननुशिष्टत्वेनान्याय्य-त्वात्कथञ्चिदनुशासनेऽपि वा हुताहुतसमुदायस्यैव पूर्वं त्यक्त-स्य होमेन नाशादहुतस्य च भक्ष्यमाणस्यात्यक्तत्वेनेन्द्रपीतपद-व्यपदेशानुपपत्तेः पीतत्वमेव पीतपदेनोच्यते । पानस्य च रसा-स्वादनरूपस्य देवतानिष्ठस्य व्यासज्य त्यक्तेऽपि सोमेऽवयवशः प्रत्येकमुपपत्तेः ङित्थमातृवदेवेन्द्रपीतपदेन भक्ष्यमाणार्धस्य बुद्ध्या निष्कृष्टस्य व्यपदेशोपपत्तिः ।

वस्तुतस्तु रसास्वादनरूपस्य पानस्य नवमे निषेत्स्यमान-त्वात्कथञ्चिदङ्गीकारेऽपि वा त्यक्तत्ववत्समुदायस्यैव तत्सम्भवेना-हुतमात्रे तद्व्यपदेशस्यौपचारिकत्वतौल्यापत्तेः न पीतत्वं पीतपदा-र्थः । नाप्याहवनीयमुखप्रक्षेपरूपमौपचारिकं पानं लक्षणया पीतपदार्थः । तथात्वेऽपि हुतस्यैव पीतपदेन व्यपदेशापत्तेः तत्सम्ब-न्धिनो भक्ष्यमाणस्याहुतस्येन्द्रपीतपदेनोपलक्षणार्थम् । इन्द्रपीत-पदे धातूपपदप्रत्ययसमुदाये लक्षणापत्तेः । अतोऽत्र पीतपदेन देवस्वपदालम्बनतया पात्नीवताद्यधिकरणोपपादितो देवतास्वी-कार एव लक्षणया प्रतिपाद्यते ।

एवं चेन्द्रेण स्वीकृत इत्येवं तृतीयासमासेऽपि "कर्तृकरणे कृताबहुल"मित्येव लक्षणानुगतो भविष्यति । स्वीकारस्य च ध-र्मिग्राहकप्रमाणेनावयवावयविसाधारण्येनैव कल्पनान्न हुतेशषप्र-काशने कश्चिदुपचारः ।

लोके च व्यासज्य त्यागेऽपि प्रत्येकमेव सम्प्रदानेन स्वी-

कारदर्शनात् स्वीकारस्य प्रतिदेवताधिष्ठानं भेदेन कल्पनोपपत्तेः इत्थमातृवद्व्यासज्य त्यागेऽर्धस्येन्द्रपीतशब्देन व्यपदेशोपपत्तिः । चतुर्धाकरणे तु तद्धितेन देवतात्वस्यैवोक्तत्वाद्व्यासज्यवृत्तिदेवताकस्य ग्रहणमिति वैषम्यादपौनरुक्त्यं च । सूत्रं स्पष्टम् ॥

(इति पूर्वः पक्षः)

सू—एकस्मिन्वा देवतान्तराद्विभागवत् ॥३-२-४०॥

(अथ सिद्धान्तः)

नान्यसहितेन्द्रदेवताके मन्त्रः । त्वदुक्तरीत्यैव रसास्वादनरूपस्याग्निमुखप्रक्षेपरूपस्य वा पानस्येन्द्रपीतपदेनानभिधानात् । स्वीकृतत्वं तु पीतपदेन लक्ष्यत इति यद्यपि शक्यते वक्तुं तथापि स्वीकारस्य व्यासज्यवृत्तिदेवतास्थले व्यासक्तदेवतानिरूपितस्यैकस्यैव लाघवेन कल्पनोपपत्तौ तन्नानात्वकल्पने प्रमाणाभावाच्चतुर्धाकरणरूपविभागवदेव नैकेन व्यपदेशोपपत्तिः । अत एव सूत्रे देवतान्तराद्देवतान्तरनिरूपितस्वीकारादित्येवं व्याख्येयम् ।

यत्तु वार्तिकादौ यथाश्रुतसूत्रस्वारस्यात्त्याग एव यजमानव्यापारः पीतपदेन लक्ष्यत इत्यङ्गीकृत्य सिद्धान्त उपपादितः, स स्वीकारमनङ्गीकृत्यापि सिद्धान्तश्शक्यते वक्तुमिति प्रौढिप्रदर्शनार्थम् ।

वस्तुतस्तु स्वीकाराङ्गीकरणावश्यकत्वस्यापि पात्नीवताधिकरणादावुपपादनात्त्यागस्य च हुताहुतसमुदायविषयत्वेनाहुतमात्रविषयत्वाभावादहुतस्य धातूपपदप्रत्ययसमुदायात्मकेनेन्द्रपीतपदेन पुनरपि लक्षणापत्तेः स्वीकारस्य तु धर्मिग्राहकप्रमाणेनावयवावयविवृत्तित्वेनैव कल्पनाल्लाघवेन पाधातुना स्वीकारमात्रं लक्षयित्वा सिद्धान्त उपपादनीयः ।

अमन्त्रकत्वपूर्वपक्षस्य चास्थायित्वेन स्थायिविचारप्रयोजनम्-ऐन्द्राग्नेऽपि सवनविशेषणतया भक्षमन्त्रे प्रयोज्ये तदर्थानुसन्धानवेलायां पीतपदेन व्यासज्यवृत्तिदेवतानिरूपित एकस्वीकारत्वान्न तस्यानुसन्धानं सिद्धान्ते । पूर्वपक्षे भिन्नत्वात्तद्भवसेवेति द्रष्टव्यम् । सूत्रं व्याख्यातम् ॥

इति द्वितीयान्तरागर्भिण्यां प्रथममैन्द्राग्नभक्षे मन्त्राभावाधिकरणम् । (१८)

अथ भक्षमन्त्रस्य गायत्रान्यच्छन्दस्केऽपि विनियोगाधिकरणम् ॥ (१९)

सू-छन्दश्च देवतावत् ॥३-२-४१॥

(विषयसंशयसङ्गतयः)

भक्षमन्त्र एव 'गायत्रछन्दस' इत्यादि श्रुतम् । तच्च गायत्रं छन्दो यस्येति व्युत्पत्त्यानन्तरपदोपात्ततत्तत्सोमविशेषणं, न तु पूर्वपदोपात्तसवनविशेषणम् । सिद्धान्तवदविमृष्टविधेयांशतापत्तेरित्यविवादम् । इदं तु विचार्यते-किमेतत्पदसामर्थ्यानुरोधेन केवलगायत्रछन्दस्केन्द्रप्रदान एव भक्षमन्त्रः । किं वान्यच्छन्दोयुक्तगायत्रछन्दस्केऽपीति । पादाध्यायसङ्गती स्पष्टे । इन्द्रपीतपदेनेव केवलगायत्रच्छन्दस्क एव प्रसक्तस्यापवादादनन्तरा ।

यद्यपि चायं विचारः इन्द्रपीताधिकरणसिद्धान्ते सवनविशेषणत्वे स्थितेऽपि केवलगायत्रच्छन्दस्कप्रदानवत्प्रातस्सवनसम्बन्धिसोमभक्षण एवायं मन्त्र उतान्यसहितेऽपीत्येव शक्यते कर्तुं तथापि पूर्वाधिकरणापवादत्वयेहापि सङ्गतिसत्त्वादानन्तरा कृत्वा चिन्तारूपेणापि विचारे कश्चिद्विरोधः ।

वस्तुतस्तु सवनविशेषणत्वे गायत्रादिपदानां "गायत्रं प्रातस्सवनं, त्रैष्टुभं माध्यन्दिनं सवनं, जागतं तृतीयसवनमित्याद्यर्थवादान्तरे तत्तत्सवनसामानाधिकरण्यदर्शनेन गौण्या वृत्त्या तत्तत्सवनप्रतिपादकत्वाद्गायत्रच्छन्दःपदे कर्मधारयेणैव तत्सवनविशेषणत्वोपपत्तेर्नोक्तविचारप्रयोजनमस्तीतीहैव सङ्गतिः ।

(पूर्वपक्षः)

तत्र पूर्वाधिकरणवदेव गायत्रच्छन्दःपदस्यान्यसापेक्षगायत्रच्छन्दस्कप्रदानविषयत्वे बहुव्रीहिसमासभङ्गभयेन केवलगायत्रच्छन्दस्कप्रदानसम्बन्धिसोमपरत्वम् ।

न च ज्योतिष्टोमे तादृशप्रदानाभावः । तत्र तदभावेऽपि यत्र बृहस्पतिसवादौ 'गायत्रमेतदहर्भवती'त्यादिश्रुतेः केवलगायत्रादिच्छन्दस्कता तत्रास्योत्कर्षोपपत्तेः ।

न च सामान्यसम्बन्धबोधकप्रमाणाभावः । लौकिकसोमे केवलगायत्रच्छन्दस्कत्वस्य प्रातस्सवनसम्बन्धित्वस्येन्द्रपीतत्वादेश्चासम्भवेन तद्व्यावृत्त्या पारिशेष्यादेव विशेषणसामर्थ्याद्बृहस्पतिसवीयसोमप्रतीत्युपपत्तेस्तत्प्रयोजनाभावात् ।

यत्त्वत्र कैश्चिद्भक्षानुवाकसमाख्यया सामान्यसम्बन्ध इत्युक्तम्, तल्लोकेऽपि भक्षसद्भावादुपेक्षितम् । तस्मात् बृहस्पतिसवीयैन्द्रप्रदान एवायं मन्त्रः । न प्राकृते । सूत्रं स्पष्टम् ॥

(इति पूर्वपक्षः)

सू—सर्वेषु वाऽभावादेकच्छन्दसः ॥३—२—४२॥ (सि)

(अथ सिद्धान्तः)

उपदेशातिदेशाभ्यां सर्वेष्वेवायं मन्त्रः । प्रकृतावेवायोगव्यावृत्तिमात्रप्रकाशनेन निवेशोपपत्तेः ।

३२ अर्थसंग्रहः । पूर्वमीमांसासारसंग्रहरूपः । श्रीलौगाक्षिभास्करविरचि-
तः। श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षु-
विरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः।(मीमां०२) रु०१—८
३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम् । परमर्षि-
भारद्वाजोद्द्योतकरविरचितम् । महर्षि-गोतमादिचरितसङ्क-
लितबृहत्भूमिकासहितम् । (न्यायं वि० ५) रु० ६—०
३४ शुक्लयजुर्वेदसंहिता । वाजसनेयिमाध्यन्दिनशाखीया । श्रीमदुव्व-
टाचार्यविरचितमन्त्रभाष्येण श्
दीपेन च सहिता । (भाग ०
३५ शुक्लयजुर्वेदकाण्वसंहिता । श्रीसाय
१ अध्यायादारभ्य २० अध्याय ०
३६ सिद्धान्तलेशसंग्रहः । श्रीमदप्पयदी
परिव्राजकाचार्यकृष्णानन्दतीर्थ
या व्याख्यया समलंकृतः । ०
३७ काशिका । श्रीपाणिनिमुनिविरचित
वृद्धर-वामन-जयादित्यविनिर्मि
३८ प्राकृतप्रकाशः । भामहकृतः । श्रीम
तः । टिप्पण्या च संयोजितः । ४
३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्
दसमेतः । ०
४० श्रीनारदीयसंहिता । ब्रह्मणोपदिष्टो
ग्रन्थः । ~~(ज्योतिष २) रु० ०—६~~
४१ मेदिनीकोशः । मेदिनीकारविरचितः । (कोशं १) रु० १—८
४२ मीमांसादर्शनम् । श्रीशबरस्वामिविरचितभाष्यसहितम्
सपूर्णम् । (भाग१—२) (मीमांसा ३) रु० १०—०
४३ न्यायदर्शनम् । श्रीगोतममुनीप्रणीतम् । श्रीवात्स्यायनमुनीप्रणीत-
भाष्यसहितम् । श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचि-
तन्यायसूत्रवृत्त्यनुगतम् । टिप्पण्यादिसहितम् (न्यायं ६) रु० ३—०
४४ दानमयूखः । विद्वद्वरश्रीनीलकण्ठभट्टविरचितः (धर्मशास्त्रं १) रु० १—८
४५ कालमाधवः । विद्वद्वरश्रीमाधवाचार्यविरचितः। (धर्मशास्त्रं२) रु० १—८
४६ भास्वती । श्रीमच्छतानन्दविरचिता । श्रीमातृप्रसाद (दैवज्ञभू-
षण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहरण
भाषाटीकाभ्यां सहिता । (ज्योतिषं ३) रु० २—०
४७ फक्किकाप्रकाशः । उपाध्यायोपाह्ववैयाकरणकेसरीबिरुदाङ्कितमैथि-
लेन्द्रदत्तशर्मविरचितः । पं० सीतारामशर्मकृतटिप्पण्या
विभूषितः। (व्याकरणं ८) रु० १—४
४८ मिताक्षरा । श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या--श्रीम-
त्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामि-
कृता । शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च। (वेदा०७) रु० १—४
काव्यप्रकाशः । श्रीमम्मटाचार्यविरचितः । पं० श्रीहरिशङ्करशर्मणा
मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः। (काव्य०४) रु०४—०

५० अधिकरणकौमुदी । श्रीदेवनाथठक्कुरकृता । (मीमां० ४) रु० १—०
५१ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् म.म. श्रीमल्लिनाथकृतसञ्जीविनीटीकयोपेतम् पं० श्रीकनकलालठक्कुरेण विरचितया भावबोधिनी टिप्पण्या समलङ्कृतः संपूर्णम् । (काव्य ५) रु० १—४
५२ काथबोधः । साजनीकृत टीकोपेतः । दत्तात्रेय सम्प्रदायाऽनुगतः । रु० —८
५३ रसचन्द्रिका । पर्वतीय-पण्डितप्रवर-श्रीविश्वेश्वरपाण्डेय निर्मिता । (काव्य० ६) रु० १—०
५४ अलङ्कारमुक्तावली । पर्वतीय-विद्वद्वर-श्रीविश्वेश्वर पाण्डेय-निर्मिता । (काव्य० वि० ७) रु० -१२-०
५५ वृत्तरत्नाकरः-भट्टकेदारप्रणीतः । नारायणभट्टीयव्याख्यासहितः। सम्पादकनिर्मितविषमस्थलटिप्पणोपेतः । श्रुतबोधच्छन्दोमञ्जरीसुवृत्ततिलकैश्च समेतः । (छंद वि० १) १-८-०
५६ अलङ्कारशेखरः । केशवमिश्रकृतः । साहित्योपाध्याय श्री अनन्तरामशास्त्रिणा भूमिकादिभिः संभूष्य संशोधितः । (अल०वि०१) १—४
५७ शक्तिवादः । श्रीगदाधरभट्टाचार्यप्रणीतः । टीकात्रयोपेतः । कृष्णभट्टकृतया मञ्जूषया-माधवभट्टाचार्यनिर्मितया विवृत्या श्रीमन्माध्वसंप्रदायाचार्य्यदार्शनिकसार्वभौमसाहित्यदर्शनाद्याचार्यतर्करत्नन्यायरत्न गोस्वामिदामोदरशास्त्रिरचितया विनोदिन्या च समेतः । (न्या० वि० ७) २-०-०
५८ प्रौढमनोरमा । म. म. श्रीभट्टोजीदीक्षितविरचिता तत्पौत्र म. म. श्रीहरिदीक्षितविरचितलघुशब्दरत्नाख्यव्याख्ययासमेता । म. म. पण्डितश्रीभैरवमिश्रविरचितशब्दरत्नव्याख्यया युक्ता । श्रीयुतभाण्डारीत्युपाह्वमाधवशास्त्रिविरचित प्रभानामकटिप्पण्या समलङ्कृता । श्रीयतजगन्नाथशास्त्रिविरचितयाऽव्ययीभावस्य शब्दरत्नप्रदीपकनामकटिप्पण्याऽलङ्कृता (अव्ययीभावान्तः प्रथमो भागः) (व्याकरण वि० ९) रु० ५—०—०.
५९ आपस्तम्बगृह्यसूत्रम् । श्रीहरदत्तप्रणीतयाऽनाकुलाख्यया व्याख्यया, श्रीसुदर्शनाचार्यप्रणीतया तात्पर्यदर्शनाख्यया व्याख्यया च समलङ्कृतम्, पृथक् सूत्रपाठेन, पाठभेदेन, मीमांसापदार्थविवरणेन च संयोजितम् (कर्म० वि० ५) मूल्यम् रु० ३—०—०
६० नाट्यशास्त्रम् । भरतमुनिप्रणीतम् (सम्पूर्णम्) साहित्योपाध्याय एम.ए. इत्यादिपदवीभाजा पण्डित बटुकनाथ शर्म्मणा तथा साहित्यशास्त्रि एम.ए. पदवीभृता पण्डित बलदेवोपाध्यायेन च सम्पादितम् । (नाट्यशास्त्र वि० १) मूल्यम् रु० ५-०-०.

जयकृष्णदास—हरिदासगुप्तः,
पत्रादिप्रेषणस्थानम्
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमन्दिर के उत्तर फाटक
बनारस सिटी ।